श्रीगणेशाय नमः ॥ अथांत्येष्टिरुच्यते ॥ नत्वा शंभुं गणेशं
विष्णुं च गणपूजितं भैरवं भक्तनाथं श्रेणानां तत्र लक्ष्मेलसं
तिगोरिलियाशंकरोयत्रभक्तमो ॥ कुर्वेहं प्रेतकार्याणि
निखिलस्तु निमतं चावलोक्य वै सम्यक्शास्त्राणां लोपनामा
मतविधिविहितां शुद्धिदां वैद्यनाथे ॥ १ ॥ तत्र तावदास
न्नमरणानां प्रायश्चित्तमुच्यते ॥ तत्र स्वस्थ वस्थाया
मेव प्रायश्चित्तं कुर्यात् ॥ तदुक्तं विधानपारिजाते ॥ लघ्वं
शांश्चैव कृत्रिमेभ्यः प्रातः स्नात्वा नराधिप ॥ आत्मशुद्धिं तु
...र्वपापापनोदिनीं ॥ ब्रह्महत्या...पापेषु लिंगा

॥१॥

...र्वदा... ॥ तेषां तस्मा पर्षां सर्वं प्रायश्चित्तमिते...
ते ॥ तद्यथा ॥ तीर्थं गत्वा ब्राह्मणानाहूय कृतस्नानो द...
वासः ॥ ब्राह्मणान्प्रदक्षिणीकृत्य अवनीं स्पृष्ट्वा पू...
येन् ॥ ततः पर्षदाग्रे गोवृषयोः प्रत्येकं प्रत्याम्नाय स्थले न
यथाशक्ति स्वर्णरूप्ययोर्निष्कं ॥ तदर्धं वा ॥ तदर्धं वा नि
धाय मम जन्मप्रभृति मरण पर्यंतं ज्ञाताज्ञान म...
द सहस्रकायिकवाचिकमानसिकसांसर्गिक स्पृष्टास्पृ
ष्ट भुक्ताभुक्त पीतापीत सकल पातक उपपातक अतिपातक
लघुपातक संकरीकरण मलिनीकरण अपात्रीकर...

॥१॥

णजाति भ्रंशकरण प्रकीर्णका... नां पातकादीनां नि...
रासार्थं प्रायश्चित्तं बुद्धिस्थ मम अनुग्रहं कर्तुं भवन्तः समर्थाः पु
नः प्रणमेत् ॥ अथ प्रार्थना ॥ सर्वधर्मविवेक्तारो गो
प्तारः सकला द्विजाः ॥ मम देहस्य संशुद्धिं कुर्वन्तु द्वि
ज सत्तमः ॥ मया कृतं महाघोरं ज्ञातमज्ञातं किल्बिषं ॥
प्रसादः क्रियतां मह्यं शुभ ...नां प्रयच्छथ ॥ ततस्तैस्त
स्य शरीरं दृष्ट्वा दिशा ... मुच्च मम मध्यमादि पक्षाश्चा वि
चार्य अस्मिन्पक्षे अयं ब्राह्मण इति निश्चित्य सभा...
वादकपुरुषवाचनद्वारा कथयेयुः ॥ भद्र पुरुषा...

पु०

मत्वा चरणं चैष्याद्विभिः वधाय सभ्यम्प्रज्ञोचा।। द्वतां न
लिपुटोभ्यस्त्वात्तदुपदिष्टं श्रणोतु।। सभ्याश्च षडब्दत्र्या
ब्दसार्द्धं काब्दद्याजायणद्वये कृचांद्रायणेषु कृच्चनपक्षे
रात्म्यानुसारेणोपदिशेयुः।। तथा च मिताक्षरायां।।
११२।। जन्मप्रभृतिपापानि बहूनि विविधानि च।। हत्यावर्ज्यं
गब्रह्महत्यायाः षडब्दव्रतमाचरेदिति।। विधानपारिजा ।।२।।
तेपि।। पापं शाब्दं चेन्नुरब्दं वात्यब्दं त्र्यब्दमथापि वा।।
सार्द्धाब्दमप्यथैकाब्दं यथाशक्ति समाचरेत्।। इति।। अ।।
सच्चोपदेशात्तु तन्मध्ये वृद्धेन सर्वं तु मत्या कार्यं।।

ततः शान्तेनोपवासः।। इतरेण हविष्याशनं।। ततो द्वित्रि
रहोऽभिरवसानं चेदन्यतमस्मिन्दिने व्रतमध्याह्ने शु
श्चैर्गङ्गादितीर्थं गत्वा सायाह्ने देशकालौ संकीर्त्य मम ज
न्मप्रभृति मरणपर्यन्तं ज्ञाताज्ञातादि पातकानां सर्व
सर्वपापक्षयार्थं मरणकालमुद्दिश्य प्यर्थं च आलतेयुप
दिष्टं तत्सर्वं निरंशं सहितं करिष्ये।। अस्य रात्र्येव तस्मि
न्नेव दिने कुर्यात्।। तदंगवपनं दंतधावनं भस्मादि देशका
लानि पञ्चगव्यप्राशनं करिष्ये।। न सभर्तृकाणां स्त्रीणां
वपनं कर्तव्यं।। तदुक्तं पाराशरेण।। वपनं नैव नारीणां ना

नुत्रज्जलपादिकं ॥ नगो [illegible] श्वरायनंतासां क्षीरबालस्य
बाजिनमिति ॥ सत्यपि निषेधे जीवत्पितृकस्य कर्तव्यं ॥
तथा च स्मृतिः ॥ क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रु
वं ॥ पित्रादिमृतदीक्षासु यात्रायज्ञविन्नेतीर्थे इति ॥ निषेधे च कृ
॥३॥ सत्यपि स्मृते प्रतिप्रसवः सिध्यति ॥ यानि कानि च पापा
नि ब्रह्महत्यासमानि च ॥ केशानाश्रित्य तिष्ठंति तस्मात्के ॥३॥
शान्वपाम्यहं ॥ कक्षोपस्थशिखावर्जं नखरोमाणि
वापयित्वा स्नात्वा हविष्यासनपक्षोदं तर्पणं कुर्यात् ॥ तत्र वर
मंत्रः ॥ आयुर्बलं यशो वर्चः प्रजाः पशून् वसूनि च ॥ ब्रह्म

प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ अन्नाद्यायेति वा ॥
इति दंतधावनं ॥ [illegible]त्वा प्रक्षाल्य त्यजेत् ॥ अथ दश स्नानानि ॥
तत्र भस्मस्नानं ॥ तद्यथा ॥ ईशानाय नम इति शिरसि ॥
तत्पुरुषाय मुखे ॥ अघोराय नम इति हृदये ॥ वामदेवाये
ति गुह्ये ॥ सद्योजातेति पादयोः ॥ प्रणवेति सर्वांगे ॥ अ
ग्निरिति भस्मेत्यादिभिर्वा ॥ इति भस्मस्नानं ॥ गोमय
ति रामिं गोमयेन ॥ अग्रमग्रं चरंतीनामोषधीनां रसं वने ॥
तासामृषभपत्नीनां पवित्रं कायशोधनं ॥ यन्मे रोगांश्च
शोकांश्च नुद गोमय सर्वदा ॥ इति गोमयस्नानं ॥ २ ॥ अथ

॥४॥

मृत्तिकास्नानं ॥ तदुक्तं पारिजाते ॥ बलिरथापर्वता नाभि
तिष्ठमिंप्रार्थ्य ॥ मा वो रिषखनीति खनित्वा ॥ स्योना पृ
थिवीति मृदं गृहीत्वा ॥ आयने ते परायण इति दूर्वां गृहीत्वा ॥
गायत्र्याभ्युक्ष्य भक्त मौनि धायाचम्य मृदा स्नानं करिष्य इ
ति संकल्प मृदं कुशोदकेनाभ्युक्ष्य दिक्षिपेत् ॥ तो त्रौ रामं
द्रमिति पूर्वस्यां ॥ यमाय त्वेति दक्षिणे ॥ तस्योया. मीति पश्चा
त् ॥ त्वइसोमेस्यत रत ॥ तत्तर्य स्येत्स्कू परिष्टात् ॥ ततस्त
या मृत्तिकया सर्वांगानीदं विष्णुरिति विलिंपेत् ॥ इति मृ
त्तिकास्नानं ॥ ३ ॥ गंगे च यमुने चेति तीर्थान्यावाह्यापोहिष्ठे

॥५॥

ति त्रिरूचेन स्नानात् ॥ ४ ॥ अथ पंचगव्यस्नानं ॥ गायत्र्या
गोमूत्रेण स्नानं ॥ गंधद्वारामिति गोमयेन ॥ ६ ॥ आप्या
यस्वेति क्षीरेण ॥ ७ ॥ दधिक्राव्ण इति दध्ना ॥ ८ ॥ घृतं मिमि
क्ष इति घृतेन ॥ ९ ॥ देवस्य त्वेति कुशोदकेन स्ना ॥ १० ॥ अभि
षिंचामीति वाक्यशेषः ॥ स्त्रीशूद्राणाममंत्रकं ॥ इति दश
स्नानं ॥ स्नानांगतर्पणं कृत्वा धौते वाससी परिधाय तिल
कं कृत्वा ॥ विष्णुश्राद्धं कुर्यात् ॥ तदुक्तं विधानपारिजाते ॥
ततः अद्येत्यादि प्रायश्चित्तांगं विष्णुश्राद्धं करिष्ये ॥ पूर्वाभि
मुखान् त्रीन्योपि द्विजान् युग्मान् ब्राह्मणानुपवेशयन् निमंत्रयेत् ॥

तद्यथा॥ सर्वसम्येन॥ अस्मिन्विष्णुश्राद्धे केशवस्थाने
त्वां निमंत्रयेत्॥ एवं अनिरुद्धस्थाने द्वितीयं ब्राह्मणं॥
प्रद्युम्नस्थाने तृतीयं॥ पादौ प्रक्षाल्य आसनं दत्वा गंधा
दिभिः संपूज्य आमान्नसंकल्पं कुर्यात्॥ तद्यथा॥ इदम
मं यथोपपन्नं दास्यमानं च आत्मनः केशवाय संप्रददे
न मम॥ एवमनिरुद्धप्रद्युम्नाभ्यां॥ भोजनांते दक्षिणां द
द्यात्॥ न्यूनातिरिक्तं विष्णुश्राद्धं ब्राह्मणप्रसादात्संपूर्णम
स्तु॥ अथ वा विष्णुमुद्दिश्य त्रीन्ब्राह्मणान् गंधादिना सं
पूज्य भोजयेत् आमान्नं वा दद्यादिति॥ इति विष्णुश्राद्धं॥

स्का ॥५॥ ॥५॥

अथ पंचगव्यं॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मा
त्तस्माच्छिवं मे स्यादिहलोके परत्र च॥१॥ इति मंत्रेण गोदा
नं॥ पंचवस्तुसंस्कारान्कृत्वाग्नेस्थापनं॥ पापहा विष्णुदैवे
न व्याहृतिभिरष्टोत्तरशतमष्टाविंशति अष्टौ वा जुहुयात्॥
अथ पंचगव्यं संपादनं॥ पद्मपत्रादिपात्रे रक्ताया गोः मूत्रं त्रि
पलं॥ गायत्र्या ग्रहणं वेन वादाय॥ अंगुष्ठपर्वपरिमितं श्वेता
गोः पुरीषं गंधद्वारामित्यादाय॥ कपिलापयः सप्तपलं॥ आ
प्यायस्वेत्यादाय॥ ततो नीलायाः सप्तपलं दधि क्रोधाव्णइ
त्यादाय॥ कृष्णाया घृतमेकपलं घृतं मिमिक्ष इत्यादाय॥ देव

प

४ उ॰ कोपस्पर्शः ४

पल्लवं कुशोदकं आपोहिष्ठे त्यादाय ॥ प्रणवेनावलोक्य ॥
प्रणवेनाभिमंत्र्य सप्तकुशापत्रै हरिस्तेजुर्योक्तेन ॥ तथा ॥
इरावती धेनुमती॰ स्वाहा ॥ इदं पृथिव्यै न मम ॥ इदं विष्णुः॰ इ
दं विष्णवे ॥ मानस्तोके॰ इदं रुद्राय॰ ब्रह्मजज्ञानं॰ इदं ब्रह्मणे ॥ ४
अग्नये॰ इदम॰ सोमाय॰ इदं॰ गायत्र्या इदं सूर्याय ॥ प्रणवेन ॥६॥
इदं प्रजापतये॰ भूर्भुवस्वः ॥ इदं प्रजापतये ॥ अग्नये स्विष्टकृ ॥६॥
ते स्वाहा ॥ इदम॰ व्रतग्रहणं करिष्य इति द्विजाग्रतिब्रूयात् ॥
ततश्चनयादितिरेग्रामाद्बहिर्नक्षत्रदर्शने कार्यं ॥ गोमूत्रा
दिपरिमाणं तु शाम्यास्वल्पं वा ग्राह्यं ॥ इति पंचगव्यविधिः ॥

इदं परमात्मने न मम ॥ ८

ततो विष्णुस्मरणमोनिभृत्वा निशामतिक्रम्य ॥ प्रक्रांतं प्रायश्चि
त्तं विधाय पुनस्तरां गां कुर्यात् ॥ पूर्ववत्कृत्वा संकल्पविधिना विष्णु
श्राद्धं कृत्वा तते पूर्ववत् गोदानं चरेत् ॥ इत्युत्तरां गं ॥ अथ दशदाना
नि ॥ ॥ गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि च ॥ रौप्य
लवणमित्याहुर्दशदानान्यनुक्रमात् ॥ गावामंगेषु तिष्ठंति भुव
नानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥ इ
ति गोदानं ॥ सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ॥ अनंतस
स्यफलदामतः शांतिं प्रयच्छमे ॥ इति भूमिः ॥ महर्षेर्गोत्रसंभूत
कश्यपाय तिलाः स्मृताः ॥ तस्माद्देषां प्रदानेन मम पापं व्यपोहतु ॥
इति तिलाः ॥ ३ ॥ हिरण्यगर्भगर्भस्थं हेम बीजं विभा ॥ अनंतपु

न्यफलदमतः शांतिं प्रयमे ॥४॥ इति हिरण्यं ॥ कृमिधेनुषसं
भूतं सर्वत्रनुष्टुसंस्थितं ॥ देवानामाज्यमाहारमतः इत्याज्यं ॥५॥
शरणं सर्वलोकानां लज्जावरक्षपापरं ॥ सुवेषधारि वस्त्रं त्व
मतः इति वस्त्रं ॥६॥ सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥
प्राणिनां जीवनोपायमतः इति धान्यं ॥७॥ अथ गुडः ॥ यथादे
वेषु विश्वात्मा प्रवरश्च जनार्दनः ॥ सामवेदस्तु वेदानां महादे ॥७॥
वस्तु योगिनां ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा ॥
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं
ददस्व गुड सर्वदा ॥ इति गुडः ॥८॥ प्रीतिर्यतः पितॄणां च विष्णुशं

अथाहिताग्न्यानाहिताग्न्यो विषयोर्लिख्यते ॥२

करयोः सदा ॥ शिवनेत्रोद्भवं रौप्यमतः इति रौप्यं ॥९॥ तस्मा
दन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ शंभोः प्रीतिकरं नित्य
मतः शांतिं प्रयछमे ॥ इति लवणं ॥१०॥ इति दशदानानि ॥ ॥४
सर्वत्र दातत्कालमेव प्रातरग्निहोत्रं होतव्यं ॥ यदि सायंहोमात्
प्राक्काले यजमानमरणं शंका स्यात् ॥ तदा एकतंत्रेण होम
द्वयं कुर्यात् ॥ अत्र होमद्व्याहरणानंतरं प्रागुन्नयनाद्यज
मानमरणे होमद्वयस्य गार्हपत्ये दाहः ॥ ततः परमाहवनीये ॥
इति वस्तुदाहः ॥ पौर्णमा सेष्ट्यानंतरं दक्षिणाग्नौ स्थालीपाकं यज
मानस्य मरणशंका स्यात्तदैवामावास्येष्टिं कुर्यात् ॥ तत्र

पौर्णमासेष्ट्यनंतरं यस्मिन्दिने अमावास्येष्टिः क्रियते तद्दि
नादारभ्य दर्शेष्टेः प्राक् यावत् सायंप्रातर्होममन्त्रान्तं त्रे
णानुकुर्यात् ॥ केचित्तु कृष्णपक्षे पितृमृते अमावास्येष्टिं कुर्वीत ॥
न सायंप्रातर्होमादवर्जयित्वा पिंडपितृयज्ञं दर्शेष्टिः कर्त
व्यः ॥ पिंडपितृयज्ञस्य दर्शांगत्वात् ॥ एवं वैश्वदेवपर्वणि क्रि
यमाणे यजमानस्य मरणशंकास्याच्चेद्वरुणप्रघाससाकमे
धाशुनासीरीयाणां समापनं ॥ तत्र वैश्वदेवपर्वणि इष्टे तेभ्यः
सपर्वपर्यंतं समासविधिना यथाकालं पक्षहोमं नत्वा पक्षां
ते इष्टिं कृत्वा शुना(?) पक्षहोमं पुनः पुनः पक्षांते इष्टिं कृत्वा वरुण

॥८॥ ॥८॥

२ति

प्रघासादि समापनीयं पर्वपक्षशाखे मरणशंकायां प्रा
तराहुर्वेव ॥ तथा चानुपदं सूत्रं ॥ तत्र्थेपदपरपक्षे प्रया
णं शंकेयाद्वयोपरपक्षस्यां तिथिशिष्टरात्रयः स्युस्तासायां
प्रातराहुतिप्रतीसंख्यायां कुर्याच्छ्याहस्यामावास्येन ह
विषेष्टासमापयेयुरेवमयत्नाविलोपइति पर्वपक्षे च यदा
त्रौ प्रातराहुतिरेवेति ॥ कात्यायनस्मृतिरपि ॥ पौर्णमा
सेष्टे तेयागेमुमूर्षु यदि याज्ञिकः ॥ दर्शयागस्तदैवस्या
त्पक्षबाहुतीर्वच्यकः ॥ सायंप्रातश्च्ययः औपासनादर्शेष्यं त
रएवचेति ॥ य आहिताग्नेर्धर्मस्यासत्औपासनिकस्यनु

द्व्यहरणानंतरं प्रागुन्नयनाद्यजमा नमरणे होमद्रव्यं गा
र्हपत्ये प्रक्षिप्य दाहः ।। एवं हुतप्रातर्होमकालपर्यंतं जीव
ती तदा पुनः स्वकाले प्रातर्होमः कर्तव्यः ।। तत्र काले द्रव्या
भावे आज्यं संस्कृत्य पुरोनुवाक्यायाज्याभ्यां स्वस्वहविषा
तदसंभवे केवलेनाज्येन प्रधानदेवतानां यागं कुर्यात् ।। त
स्यापि असंभवे [illegible] प्रतिदैवतं पूर्णाहुतीर्जुहु
यात् ।। एवमेव पक्षादिकर्मादि सकलं कर्तव्यं ।। असंभवे वा
सहोमदेवतानामाज्याहुतीमंत्रं वा ।। एवं हुते यद्यमावास्या
पर्यंतं जीवति ।। तदामावास्यायां केवलपिंडपितृयज्ञो दक्षि

णाग्नौ नस्यन्वाधानं प्रत्याख्यानं दर्शेष्टिश्च ।। न कर्तव्यात् ।। सकृत्के
ष्टौ क्रियमाणायां हविर्ग्रहणानंतरं प्रागासादनान्मरणे हवि
षां गार्हपत्ये दाहः ।। आसादनादूर्ध्वं मरणे आहवनीये दाहः ।।
इति देवभाष्ये ।। उत्सन्नाग्नेरुत्सृष्टाग्नेः प्रवासेपि मृतस्य च ।।
वक्ष्यमाणविधानेषु तद्विधिः प्रोच्यते मया ।। ततः संभावि
तसन्निकृष्टमरणं यजमानं शालायां गोमयगोमूत्रतीर्थो
दककुशोदकैः स्नापयित्वा शुद्धे देशे ससी परिज्ञाप्य गोमयेनो
पलिप्तायां वेदौ दक्षिणाग्रान् बहुलान् दर्भानास्तीर्य तत्र प्रा
क्शिरसं उदक् [illegible] शिरसं दक्षिणाशिरसं वा सुप्तमो निवेशयेत् ।।

वि २

मुखे सुवर्णं निक्षिपेत् ॥ कांस्यमणिबेडुर्यं वा ॥ [illegible]
दयन्यस्य मेरुं शिरसि न्यसेत् ॥ धात्रीफलं मुखे दद्या
त् कुशाग्रमुलं पदेषु च ॥ मेरुं तु द्राक्षं ॥ अन्य [illegible] द्राक्षं कुशाग्रमु
लं वा शालग्रामं च पुस्तकं ॥ एवं प्राणांस्त्यजेद्यस्तु स
गच्छेद्धरिमंदिरमिति ॥ २ ॥ दीपं प्रज्वाल्य शालग्रामस्याग्रे
॥१०॥ चौ निधाय विष्णुस्मरणं कर्तव्यं ॥ ॐ नमो भगवते वासु ॥१०॥
देवायेति समं जपः ॥ अथ उत्क्रांतिधेनुदानं ॥ अद्येत्या
दि अमुकगोत्रस्यामुकशर्मणो मम सुखेन प्राणोत्क्र
मणार्थं अमुकगोत्रायामुकशर्मणे संप्रददे न मम ॥ अत्र मंत्राः ॥

गा

उत्क्रांतेनु प्रवृत्तस्य सुखोत्क्रांतिसमृद्धये ॥ तुभ्यं सं
प्रददे धेनुमुत्क्रांतिसंज्ञिता ॥ अथ वैतरणीदानं ॥
तदुक्तं हेमाद्रौ दानखंडे ॥ अद्येत्यादि अमुकगोत्रस्या
मुकशर्मणो मम यमद्वारस्थितवैतरणाख्येन उत्तार
णार्थं गोदानमहं करिष्ये ॥ आसन्नमृत्युना देया गौः
सवत्सा तु पूर्ववत् ॥ तदभावे तु गौरेव वैरेनं कोद्धार
णाय वै ॥ १ ॥ एवं वदति सुवर्णशृंगीकादानं तत्र ॥ त
दा यदि न शक्नोति दातुं वैतरणीं तु गां ॥ शक्तोऽशक्तो नरस्त
तदा दद्यात् श्रेयो दद्यान्मृतस्य चेति ॥ अरुकरोगरहित ॥

ब्रह्मवैवर्ते ॥ युधिष्ठिर ॥ यमद्वारे महाघोरे या सा वैतर
णी नदी ॥ किंरूपा किंप्रमाणा सा कथं सा गर्हिता: किल ॥
कथं तस्याः प्रमुच्यंते केषां वा सा सुमंततं ॥ केषां कथानु
कूला लोके तद्विस्तरतो वद ॥ मार्कंडेय उवाच ॥ या सा वैत
रणी नाम यमद्वारे महानदी ॥ तस्याः प्रमाणं रूपं च शृणु
सर्वभयापहं ॥ शतयोजनविस्तीर्णा पृथुत्वे सा महासु
रि ॥ अगाधानं तु रूपा सा द्रष्टमात्रा भयावहा ॥ पूयं
शोणित तोया सा मांसकर्दम निर्मिता ॥ कृमिभिः संकु
लं तप्तं वक्रतुंडैः ग्रधैर्मुखैः ॥ शुश्रुमारैश्च मकरैर्वज्रकर्ण
धौ

रिसंयुतैः ॥ अन्यैश्च जलजैर्घोरैर्युक्ता सा मर्मभेदिभिः ॥ पतं
ति तत्र वै मर्त्याः क्रंदमानाः सुदारुणं ॥ हा भ्रातः पुत्र तातेति प्रलपं
तो मुहुर्मुहुः ॥ चिरमंतर्निमज्जंति ग्लानिं गच्छंति देहिनः ॥ चतु
र्विधैः प्राणिगणैर्दृश्या सा महानदी ॥ तरंति तस्य दानेन अन्यथा
नुपतंति ते ॥ धर्मिका दानशीलाश्च तां तरंति नरोत्तमाः ॥ सानुकूला
भवेद्येन नदी वैतरणी नृणां ॥ तच्छृणुष्व नरव्याघ्र कथ्यमानं युधि
ष्ठिर ॥ अयने विषुपुण्येन व्यतीपाते दिनक्षये ॥ अन्येषु पुण्यकाले
षु दीपते दानमादरात् ॥ पाटलामथवा कृष्णां कुर्याद्वैतरणीं शुभां ॥
स्वर्णशृंगीं रोप्यखुरीं कांस्यपात्रैर्दोहनं ॥ कृष्णवस्त्रयुगच्छन्नां सप्त
स्तु

धान्यसमन्वितान्॥ कार्पासेद्रोणशिखरे आसीनंताम्र॥ अ
नेन॥ यमंहैमंश्रकृवीत लोहदंडसमन्वितं॥ महामाहिषमारूढं दक्ष
दपाशांकरेपरे॥ इक्षुदंडमयंबध्वा उडुपंपट्टबंधनैः॥ उडुपोपरि
तांधेनुंस्वर्यदेहांसमनुकल्पयेत्॥ यमस्याग्रकाशायेद्दिवान् छत्रोपानहसं
युतान्॥ सप्तधान्यानिद्रोणमितानि॥ उडुपंक्षुद्रनौकां॥ इमंनुश्रा
रयेन्मंत्रेसग्रहोदकमंडुकं॥ विष्णुरूपाद्विजश्रेष्ठ भूदेवपंक्तिपा
वनः॥ सदक्षिणमयातुभ्यंदत्तावैतरणीनदी॥ तेनदानमं
त्रः॥ धर्मराज मंत्रंच धेनुवैतरणीतथा॥ सर्वंप्रदक्षिणीकृत्य ब्रा
ह्मणायनिवेदयेत्॥ पुच्छंसंगृह्यतद्धेनोरयेन्मस्याद्विजोनमं॥ धेनु

॥१२॥ ॥१२॥

केत्वंप्रतीक्षस्वयमद्वारेमहालये॥ उत्तितीर्षुरहंदेवि वैतरण्यै
नमोनमः॥ अनुव्रजेमंत्रः॥ अनुव्रजंगच्छंतंसर्वंतस्यगृहे
नयेत्॥ इतिवैतरणीदानं॥ ततः अमृतस्यैकामनायापुण्य
स्त्राद्दिपठनंकुर्यात्॥ एवंयजमानेनैवकर्तव्यं॥ तदशान्तौ
पुत्रादिनाकार्यं॥ ततः पुत्रादिर्वैदाहमि तिकर्णेजपेत्॥ ततः
प्रोषितेकालशेषस्योत्त्यायायाज्ञवल्क्यवचनात्॥ आहिताग्नेरा
शौचंप्रवृत्तिदिनमाह॥ आहिताग्नि [illegible] श्रौताग्निनष्टेतदहादि
वसमारभ्यदशाहाद्याशौचंनमरणादिवसात्॥ अन्यथालौकि
काग्नौतुमरणादिवसमाशौचंकुर्यान्नदाहदिवसात्॥ तथा

चांगिरः॥अनग्निमतउत्क्रांते साग्नेः संस्कारकर्मणः॥शुद्धिः सं
चयनं दाहात्स्मृताहस्तु यथातिथिः॥दाहादेवतु कर्तव्यं यस्य
वैतानिको विधिः॥इति स्मृत्यंतरात्स्व॥ततः प्राणोत्क्रमणानं
तरं पुत्रः पौत्रो नप्ता पुत्रिपुत्रिकापुत्रो वा जामाता भागिनेयः
सपिंडो वा स्त्रियो भगिनी दुहिता स्नुषा धर्मपुत्रादयो वा॥आ
॥१२॥ त्मनो यथाशक्त्यनुसारेण प्रायश्चित्तं कुर्यात्॥तत्र अद्येत्या ॥१२॥
दि तिथौ मम पितुर्मरण दिनादारभ्य निखिलौर्ध्वदेहीक
कर्माधिकारार्थं अमुक प्रायश्चित्तमहं करिष्ये तदंगवपनं क
र्ये॥याज्ञिकानीति॥रात्रिमृत्युस्त्वेतु क्रियाकर्तृवपनं प्रातरि
प

व कार्यं॥तदुक्तं स्मृतिसंग्रहे॥वपनं दहनात्पूर्वं पश्चाद्दानीमृ
ते गुरौ॥न कुर्याच्छ्रैद्ध्वादाहः स्वयं च नरकं व्रजेत्॥रात्रौ द
ग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितं॥वपनं नेष्यते रात्रौ श्व
स्तदा वपनं क्रियते इति॥यतिमरणे विशेषमाह शातातपः॥
एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियां॥न कुर्यात्पार्वणा
दन्यद्ब्रह्मीभूताय भिक्षवे॥सुतैश्च वपनं कार्यं परहंसस्य
सर्वदा॥कर्तव्यं खननं तस्य आशौचं नोदकक्रिया॥पत्नीच
वपनं कुर्याद्वृषोत्सर्गं न कारयेत्॥एकादशे द्वादशे वा पार्वणं
तु विधीयत इति॥प्रायश्चित्तं कृत्वा गोदानं॥सहस्नात्वा

॥१५॥

श्रेतस्समीपमागत्यमधुपर्कदानंतत्रमंत्रः॥संगच्छमागध
ममैवदेहेमधुपर्कसंसारमोक्षणं॥शारीरस्त्रावआगंतुनि
हन्मित्राद्रिरशोधनंगरुलोकनाथत्रेतोन्हमिमंमधुपर्कमि
ति॥ततोमृतप्रक्षालनं॥अहतवस्त्रपरिधानं॥उत्तरीयंच॥
चंदनेनशवानुलेपनं॥पुष्पैरलंकरणं॥इतिंवभाष्ये॥आ
दौभर्तृमरणेस्त्रीमरणेवादाहादिकंकथंकर्तव्यमितिप्र
संग्राह्यिरव्यते॥७॥तदुक्तंदेवभाष्ये॥ज्येष्ठायांवाकनिष्ठा
यांवामृतायांगार्हपत्यैकदेशेनन्निर्मथ्येवानवादाहपक्षेयाव
ज्जीवंकुशपत्नीसुवर्णपत्नीवाकृत्वानित्येष्टयग्निहोत्राग्रय

यां८ ॥१५॥

णानिप्रभवंति॥आवसथ्येनवापत्नीदाहः॥तस्मिन्प
क्षेकेवलस्यावसथ्यस्यपुनराधानं॥श्रौताग्नयस्तुतत्प
वा॥पुनर्विवाहासंभवेआत्मार्थमग्न्याधानंकार्यं॥तदुक्तमा
पस्तंबेन॥दानकर्मणियद्यशान्हआत्मार्थमग्न्याधेयं॥द
र्शपूर्णमासाग्निहोत्राग्रयणार्थंशेषाणिभवंति॥अन्ये
कुशमयींपत्नींकृत्वानुगृहमेधिनः॥अग्निहोत्रमुपासते
यावज्जीवमतंद्रिताः॥यदातुयुगपदेवजाययापत्योर्मरणंतयोः
सहैवदाहः॥तदुक्तंआपस्तंबेन॥सहैवपितृमेधोद्विदवनलिं
गाग्नेस्त्रासेनमतीति॥आश्वलायनब्राह्मणेपि॥अपत्नीकोप्य

५ल

॥१५॥

ग्निहोत्रमाचरेदिति॥ एवमप्याधानासंभवे उत्सन्नाग्नेर्दा
हार्थं स्मार्ताधानं कार्यं॥ तद्यथा॥ तत्रापसव्येन दक्षिणामुखे
न च सर्वं कार्यं॥ प्रेतस्यास्वाम्यासने स्थापनं॥ अग्न्योगा
रकरणं॥ नवरत्नयसंस्कारः॥ गार्हपत्यस्य पश्चान्मथनं॥
तत्र मंत्रः॥ यस्याग्नेयो ऽनुहुतो मांसकामाः संकल्पयंते य
जमानं मांसं॥ आयंतु ते ह विप्रसादयन्तु ते स्वर्गं लोकमिमं
प्रेतं नयन्तु॥ इति मथित्वा गार्हपत्यस्थापनं॥ ततस्तच्छी
र्षस्थाद्रव्याज्यं संस्कृत्य सुचिंतादग्धं गृहीतं गृहीत्वाहवनीये
लौकिकं कृत्वा दक्षिणाग्निमुपरथ्यस्य संदीपनचरुश्रपणादि

॥१५॥

दाहांतं कुर्यात्॥ एवं पत्न्याः पश्चान्मरणे विज्ञेयं॥ अथ पुत्रा
दिः स्नातः कृतापसव्यः सकलसंभारपरिसमूहनादिसंस्का
रपूर्वकं दाहार्थं संतापनाग्न्युत्पादनार्थं आहवनीयदक्षि
णाग्नी विहरति॥ ततः केनचित्सन्निहितेन गार्हपत्याहव
नीयदक्षिणा ग्निषु तिस्रो मृन्मयीस्थालीः सु घृतगो
मयचूर्णतारचूर्णयुक्ताः अधिश्रयति॥ अत्र सर्वमपसव्ये
न दक्षिणामुखेन॥ सभ्यावसथ्यौ न यंनं स्थाल्योर्मध्ये
निधाय प्रत्यग्भावेन सर्वासु स्थालीषु संकरो माप्लवयेत द
र्थं नामलेखनादिचिन्हं कार्यं॥ ततो मरणस्थाने एकांते

२ खे

१५८

॥१९॥

ष्टविधिनाप्रेतश्राद्धं॥ तत्रसर्वंलक्षणं॥ तत्र आलणासंभवे

एकंदर्भबटुमुपवेश्य॥ सर्वंकुर्यात्॥ अद्येहेत्यादि अमुक

गोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तये दाहादियोग्यतासि

द्ध्यर्थंचमरणस्थानेएकोद्दिष्टविधिनाश्राद्धमहंकरिष्ये॥

आवाहनार्चनपात्रालंभनावगाहनाभावः॥ आसनंउ

पहारप्रोक्षणं॥ आमान्नसंकल्पः॥ पिंडदानं॥ विकरावने

जनेनैरवापस्थवनेजननंगंधाद्यर्चनानामभावः॥ अक्षय्यो

दकदानेमाशीस्वधावाचनायांनिषेकाभावः॥ समाषा

न्नकुंभदानं॥ अभिरम्यतामितिपृष्ट्वाबटुविसर्गः॥ आदी

॥१९॥

नंतरंशावनाम्नामृतस्थानेपिंडदानं॥ अमुकगोत्रामुकशाव

तिप्रयोगः॥ सजलमाषान्नकुंभदानं॥ ततोद्वारदेशएवंश्राव

द्धं॥ ततःपाथनाम्नापिंडदानं॥ पांथएतत्तइतिकुंभदानं॥ त

तोऽनसिस्थालीस्थंपंचाग्निसहितंहारिउवस्त्रांछादितंशा

स्थापयित्वासर्वाणिपात्राणिएषदाज्यदर्पा [illegible] स्तिला

न्घृतंसदाहिण्यशकेलानिकाष्ठानिग्रहीत्वासपिंडअन्ये

वादक्षिणस्यांदिश्यरण्यंगछंति॥ तद्गुक्तंविधानपारिजा

ते॥ आसंधांप्रेतमारोप्यगंधपुष्पाद्यलंकृतं॥ वध्नीयान्

बांधवस्तस्यपादांगुष्ठांगुश्चौददं॥ आसंदालक्षणं॥ रवा

स

बि
॥१७॥

दिरैर्द्दिवर्द्धैर्वीशावविय हस्तं मितां ॥ आचार्यसंवीचतु
रात्यंगुल्या यामतः समाः ॥ चत्वारो द्वौ च षोडशौ अपुरस्य
कुरौस्तथा ॥ ध्वात्वानुवरणं तेषामथासंघवरोहणं ॥ नि
वीति नोवहेयुस्तं ज्ञातयोन्ये चवाहकः ॥ तथाच स्मृतिः ॥
ऋं तर्पणे चांडालभाषणे प्रेतवाहने ॥ बिण्मूत्रे मैथुने
वैवषप्ने वीतिसामाचरेन्न ॥ वाहकागर्भिणीपतिर्नेव
त्र कवर्जं ॥ तथाच धर्मप्रदीपे ॥ प्रेतवाहं गयाश्राद्धं मौंजि
बंधनमेवच ॥ विदेशागमनं क्षौरं न कुर्याद्गर्भिणीपतिः ॥१॥
स्कंधे प्रेतस्य वाहनं स्नानं केशाविसर्गतः ॥ न जिनसित्यकः

॥१७॥

सं
न

कुर्यात्तर्ज्जन्यांगौ व्यधारणमिति ॥२॥ यमगाथां गायमाना
यमसूक्तं जपंतो गच्छंति ॥ अथ यमगाथा ॥ अहरहर्नयमा
नो गामश्वं पुरुषं व्रजं ॥ वैवस्वतो न तृप्यति सुरया इव दु
र्मति ॥ अपेतो यंतु पणयाः इति यमसूक्तं ॥ ततः अंगने प्रे
तनाम्ना पिंडदानं ॥ उदकुंभदानं च ॥ ततो ग्रामश्मशानयो
र्मध्ये आघांतदिक्षं गो प्रायश्चित्तं ॥ आसंघामपि भग्नायां श्म
शाने पतिते पिवा ॥ तत्रात्र अंतरगते नांदाहच्छेदे पिवा पुनः ॥
रोवे निपतिते वापि अन्येस्मिन् चोषघातने ॥ प्राजापत्यं ततः ॥
कृत्वा कर्म सर्वं प्रवर्त्तयेदित्यग्निवचनो ॥ ततो [illegible]

त

वदेकोद्दिष्टश्राद्धं ॥ अमुकगोत्रस्यामुकप्रेतस्य दाहार्थं श्म
शानं नीयमानस्यार्द्धमार्गे विश्रामस्थाने श्राद्धं कुर्विथे ॥
पूर्ववच्छ्राद्धं ॥ श्राद्धांते प्रेतनाम्ना चतुर्दिक्षु पिंडदानं ॥ तत्र
था ॥ प्रेतवाहपतत्ते पिंड उपतिउपतिष्ठताम् ॥ प्रेतसखपत
ने ०२ प्रेतपतने ० ३ प्रेतवत्सपतने पिंड उपतिष्ठतां ॥ ४ ॥

ततो निर्हरणं कार्यं ॥ श्मशानं सन्निधो पश्चिमो शवस्य द
क्षिणशिरसः स्थापनं ॥ ततश्चितिस्थाने पूर्ववदेकोद्दिष्ट
श्राद्धं ॥ उदकुंभदानं च ॥ ततः प्रेतनाम्ना पिंडदानं कुंभदानं
च ॥ ततः सर्वा पित्रीर्थाभिमनसाध्यात्वा शवस्य स्नानं ॥

ततः पुत्रादेः स्नानं ॥ समे बहुलतृणप्रदेशे क्षास्त्यादि घ
र्षलनं ॥ गार्हपत्यादिरसाधनं ॥ सर्वं प्राचीनावितिदक्षिणामु
खः कुर्यात् ॥ गार्हपत्याहवनीयदक्षिणाग्निस्थाने पुस्तत्त
न्मे सस्कारान्कुर्यात् ॥ तत्रस्थापनं ॥ चिन्नेः सभ्यावसथ्य
योरन्तरतो ईशान्यां वा पंचस्तूप क्रमेण पुत्र वा ॥ ततो गार्ह
पत्याहवनीयोरंतराले काष्ठैः प्रणायतां चितिं कुर्यात् ॥ ततः
प्रेतस्य केशश्मश्रुलोमांच्छेदनं ॥ केशादिनां निखननं ॥
प्राचीवमुत्तरलोमकृष्णाजिनमास्तीर्य ॥ तस्मिन्प्राक्शिर
समुत्तानं प्रेतं निदध्यात् ॥ प्रेतसमं चिवस्त्रं दद्यावि य

एकेन खंडेन प्रेतमाच्छादयेत्॥ खंडांतरं स्मशानवास्य
र्थं भूमौ निरस्येत्॥ प्रेतकरे प्रेतनाम्ना पिंडदानं॥ प्रेतमा
स्ये नाभ्यंजनं॥ मुखादिसप्तसु प्राणायतनेषु सप्त हिरण्य
शकलप्रक्षेपः॥ ततः प्रागग्राण्युत्तानानि सर्वाणि पात्राणि
वक्ष्यमाणविधिना प्रेतशरीरे निदधाति॥ सव्यपाणौ रि
क्तां प्रागग्रं जुहूं प्रस्तृतं॥ हृदये प्रागग्रां रिक्तां ध्रुवां॥ मुखे प्रा
गग्रामग्निहोत्रहवनीं॥ दक्षिणनासिकायां वैकंकतं स्रु
वं प्रागग्रमुत्तानं॥ कर्णयोः प्राशित्रहरणे॥ शिरसि रिक्तं
प्रणीताचमसं॥ कपालानि च॥ अप्सु वा प्रक्षेपः॥ पार्श्वयोः

॥२१॥ ॥२१॥

स्फ्यौ॥ एकं चेत् स्फ्यं॥ द्वितीयं चरणजंघासेषु प्रातिप्रस्था
नमेषीकरं सपात्रार्थं यवग्रहणादौ यदुपयुक्तं॥ लौकिक
मेवेति केचित्॥ एकं चेद्द्विधा विभज्य पार्श्वयोरेकैकखंडं आ
सादयेत्॥ उदरे पृषदाज्यवतीं इडां प्रागग्रां॥ शिश्नसमीपे
शम्यां प्रागग्रां॥ ऊर्वोः समीपे उदगग्रे अरणी॥ तत्समीपे
अधोमुखं उलूखलमुसलं॥ आज्यस्थाली पिष्टपात्री उप
वेषः षडवत्तं अग्निष्ठ तावदानं पुरोडाशपात्री पाठ स्वर्णपात्रं
च ब्रह्मासनं प्रमुखानि सर्वाणि यज्ञपात्राण्युक्तस्थानान्त
र्मध्ये आसादयेत्॥ स्मार्तपात्राण्यरणीसहितानि चरणप

श्रा

घासिकानि च तत्रैव ॥ स्थालीपात्रकपालादीनां मृन्मयादीनां
पाषाणमयादीनां चाप्सु प्रक्षेपः ॥ लोहमयादीनां चाप्सु प्रक्षे
पो वा ब्राह्मणाय दानं वा ॥ आज्यस्थाली मृन्मयी चेत्तस्यां तत्प्र
क्षेपः ॥ ततः आहवनीयादीनामालभ्य इमं मंत्रं पठेत् ॥ त्वत्तो
स्तु दुष्कृतं कर्म अज्ञानेनाथवाप्यज्ञानता ॥ मृत्युकालवशं प्राप्य न

॥२०॥ रं पंचत्वमागतं ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतं ॥ ॥२०॥

दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छति ॥ ततश्चंदनैः
पुष्पाक्षतैरग्निनोप्तननं ॥ तत्र मंत्रः ॥ त्वं भूतकृज्जगद्योने
त्वं लोकपरिपालक ॥ उक्तः संस्कारकस्मादेनं स्वर्गंमितं नय ॥

ततोग्निक्षिप्तश्चितेरादीपनं ॥ तत्रोशिरोदेशे ॥ तदुक्तमाश्व
लायनपरिशिष्टे ॥ कर्ता शिरसि चाग्निं दद्यादिति तं ज्वलयेत्पुरि
ति ॥ मृतस्य पुत्रो वा भ्राता वान्यो ब्राह्मणो वाहूतावसथ्ये
दक्षिणामुखो गार्हपत्ये आज्यं संस्कृत्याहवनीयपरिस्तीर्ये
समिधमाधायास्मात्त्वमधिजातोसीति मंत्रेण स्रुवा समध्म
गृहीत्वाज्याहुतीं जुहोति ॥ इदमनै इत्यागः ॥ स्त्रियाश्चपस्य

ए

मंत्रस्यान्नहः ॥ ततो जुहूं घृतेन पूरयित्वा प्रेतस्य दक्षिणहस्ते
प्राम प्रमासादयति ॥ खादिरं स्रुवं सव्यनासिकायां प्राणगृ
तानं ॥ स्फ्यं दक्षिण[illegible]त्ले ॥ पात्रं चाविशेषात्तन्यस्य[illegible]नीउबो

॥२७॥

रंतरे प्रक्षेपः ॥ मन्मथे चैयीदस्तु प्रक्षेपः ॥ दक्षिणाग्रैर्दर्भैरस्थि
नेराछादनं ॥ ततस्कंधे उदकुंभं पूर्णं धृत्वा प्रेतपादप्रदेशेऽश्म
तं पाषाणं गृहीत्वा स्वयं कनिष्ठश्चाग्रे वा पृष्ठभागे छिद्रं कृत्वा
तत आरभ्य अप्रदक्षिणां चितिं परितो धारां दद्यात् ॥ ततः शि
रो देशे घटं क्षिप्त्वा पश्चादनवलोकयंतः कनिष्ठपूर्वाः सर्वे ग
छेयुः ॥ येन पाषाणेन स्फोटकं कृतं दशादिनपर्यंतं तद्रक्षा
णं विधाय ॥ उत्तरीयं वस्त्रसंरक्षणं च ॥ ततः उदकसमीपं ग
त्वा लौकिकप्रेषोगादृशोदनं च ॥ ॥ अथावसथ्यप्राणांत्रो
प्रतिपत्तिर्लिख्यते ॥ शिरसि चमसं पार्श्वयोः स्रुवौ ॥

॥२७॥

श्रवणाकर्मसंबधिद्वितीयं ॥ एकंचैद्विधा कृत्वा पार्श्वयोः
कुर्यात् ॥ आंडयोररणी उदगग्रे ॥ प्रोक्षणीपात्रादीनाम
र्योरंतरे प्रक्षेपः ॥ चात्रौ बिलिकयोश्च ॥ मन्मयादीनामं
भसि ॥ हस्तयोस्तु दुग्धरं कर्ममित्याद्विधि चेतेरादीपनं ॥ वहि
रजा ॥ आज्यं संस्कृत्य ॥ समिद्वयं स्रुवेणा स्मात्वमित्याहु
रितिहोमः ॥ दक्षिणनासिकायां स्रुवं निधाय दक्षिणहस्ते ॥
शेषमाहिताग्निवत् ॥ अनाहिताग्नेरपि पूर्वं स्मार्तपात्राणां
प्रतिपत्तिः स्मृतातदनंतरं श्रौतानां पात्राणां मितिशाकल्या
यनिः ॥ तथा च कात्यायनः ॥ एवमेवाहिताग्नेस्तु पान्यौत्रं

स्नादिकं भवेत् ॥ इत्युच्छाजिनादिकश्चात्र विशेषः ॥ सस्तत्रचो
दित इति ॥ शाट्यायननिश्चया ॥ सभ्यावसथ्या वाहिताग्नेर्देह
कर्मणि न प्रयुज्यते ॥ तयोः गार्हदीप्यांदक्षिणाग्निनादेस्य
च प्रक्रमानतिक्रम्य पंचभूसंस्कारान् कृत्वोल्लेखनोद्दीत
प्रर्वमेवोक्तं ॥ पात्राणि तु प्रयुज्यंते ॥ ततः कपालमोक्षप ॥२२॥
र्यंतं स्थित्वा ॥ दाहे जाते किंचित्समिषेराणं कुर्यात् ॥ निःशी ॥२२॥
षस्तु न दग्धव्यं इति वचनात् ॥ एवं दिवा तस्य दिवा दाहः ॥
रात्रिर्मृतस्य रात्रावेव दाहः ॥ तदुक्तं विधान पारिजाते ॥ दिवा
वा यदि वा रात्रौ शाव तिष्ठति कर्हिचित् ॥ तस [illegible] तमिसा

ग

कुर्द्दहनेतस्य कार्यतिः ॥ पंचगव्येन संस्नाप्य प्राजापत्यं त्रयं च
रेत् ॥ तदा दाहं प्रकुर्वीत पुत्रादिः शास्त्रतः ॥ क्रमादिति ॥ दाहे
क्रियमाणे यद्यदग्निर्नश्यति तदा हरेणुः ॥ यत्तेषां निगु
तद्देहावर्षं चेल्लभ्यते कश्चित् ॥ तदर्धार्द्धं काष्ठं नु नीत्वा निर्म
थ्यं तं दहेत् ॥ यद्यर्धदग्धकाष्ठं नु तदा कथंचेन्न लभ्यते ॥
तदा तच्छवे खंडं नु प्रक्षिप्तव्यं महाजले ॥ अन्यच्च ॥ अथाग्नि
नाशः सार्हिस्यादाहिताग्नेस्तदोच्यते ॥ तयोर्मुख्ये मथितेनैनं
संस्कुर्युस्तदभावतः ॥ तद्भस्मस्पृष्टकाष्ठेन मथितेनाग्नि
र्दहेच्चयनमिति ॥ कुशावालौकिके वह्नौ भस्मर्ज्जुरः स्यार्घेतं कुर्वीः ॥

स्रुवेण वा स्रुचा तेन दग्ध शरीरं प्रक्षिप्त इति ॥ ततः पुत्रादयः
सपत्नसपत्नसमिधो गृहीत्वा चिताग्नौ प्रति प्रदक्षिणमेकैकं
समित्क्षेपं कुर्यात् ॥ ततः कुमारेणाऽमुकोपरि सप्त प्रहाराः
कर्तव्याः ॥ क्रव्यादाय नमस्तुभ्यमिति पठंति ॥ ततश्चितां
मुक्त्वा स्नानार्थं गच्छंति ॥ यस्तूत्तरदानाभिज्ञो कं च न पुरुषं
शालकं वोदकं करिष्याम इति मंत्रेणोदकं याचते ॥ कुरुध्वं
मा चैवं पुनरित्यशतवर्षप्रते ॥ इति प्रतिवचनं ॥ यातं वर्षी
प्रेते कुरुध्वं ॥ ततः पुत्रादयः सपिंडाः समानोदकाश्च एकव
स्त्रा ॥ प्राचीनावीतिनो मुक्तकेशा दक्षिणामुखाः ॥ सव्यो

॥२३॥

पाणेरनामिकया पापं नोदयत् अप नः शोशुचदघमि
ति मंत्रेण निमज्जंति तूष्णीं ॥ सर्वे मलापहं स्नानं कुर्वंति ॥
अंगोद्धर्षणस्य विहितप्रेतपिंडत्वादि कल्पः ॥ ततस्तीर
मागत्य शिखां बध्वा दक्षिणाग्रान् दर्भान् अयुग्मान् स्तृत्वा
न्हस्तस्तयोः कृत्वा सतिलमुदकं पाणिभ्यामादाय दक्षिणा
मुखा वाग्यताः पितृतीर्थेन भस्मोपाषाणे वा एकैकमंजलिं
तिस्रस्तिस्रो वा निषिंचति ॥ अमुकगोत्रामुकप्रेत एतत्ते
उदकमुपतिष्ठतामिति ॥ अमुकगोत्र अमुकप्रेत तत्तदकं
तृप्यतामिति वा ॥ अमुकगोत्रं अमुकप्रेतं तर्पयामीति वा

यथास्वगृह्यप्रयोगः॥ ततो दंतधावनं॥ तदुक्तं गारुडे॥ नी
लोंजलेपोद्धृते पश्चाद्विधाय दंतधावनं॥ सर्जंति गोत्रिणः
सर्वे दिनानि नव कल्पप॥ एवं गोत्रजाः सपिंडाश्च प्रथ
मदिन विधेरंते वा पाषाणोपरि जलांजलिदानं कुर्युः॥
अथ कर्ता ईवस्त्रः अद्येहेत्यादि अमुकसगोत्रस्यामु
॥२४॥ कप्रेतस्य प्रेतत्वविमुक्त्यै प्रथमदिनविधिं कर्तुं स्नान ॥२४॥
महं करिष्ये॥ स्नात्वा कुशैर्धर्मानं स्थाप्य प्रेतस्य हा हस्त
नितन्तृषोपशमनार्थं तिलतोयांजलिदानं करिष्ये॥ अ
मुकगोत्रामुकप्रेत दाहजनितन्तृषोपशमनार्थं प्रथमे

ह्नि एतत्ते तिलोदकमुपतिष्ठतामिति॥ एवं दशाहांतं प्रत्यहमेकै
कमंजलिं वर्धयेत्॥ द्वयं वा त्रयं वा प्रत्यहमेकमेव वा॥ स्नात्वामु
कगोत्रामुकप्रेत एतत्ते अवनेजनमुपतिष्ठतामिति॥ अमुकगोत्रा क
मुकप्रेत आद्येह्नि शिरोवयवनिष्पत्त्यर्थं प्राणवायुनिष्पत्तये च
एष पिंडस्त्वोपतिष्ठतामिति॥ तथैव प्रत्यवनेजनं॥ पिंडपृष्ठे
च कुर्यात्॥ तथैव श्राद्धे॥ दद्यात्प्रेताय पिंडं तु दक्षिणामुखोभिः स्वः
स्थितः॥ अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः॥ ऊर्णा
तंतुमयैः शुक्लैर्वासोभिः पिंडमर्चयेत्॥ पिंडस्योपरि हस्तं दत्वा
तत्र मंत्रः॥ अनादिनिधनो देवः शंखचक्रगदाधरः॥ अव्ययः

॥२८॥

पुंडरीकाक्षः प्रेतमोक्षप्रदो भव॥ अतसीपुष्पसंकाशं पीतवा-
र्मलवाससं॥ ये नमस्यंति गोविंदं न तेषां विद्यते भयं॥ अर्क-
कर्मेति पिंडं प्रवाहयेत्॥ स्नात्वा नवश्राद्धं कुर्यात्॥ तथा चस्मृ-
तिः॥ प्रथमे द्वितीये वा पंचमे सप्तमे दिवा॥ नवमैकादशी
चैव षण्णवश्राद्धमुच्यते॥ अद्येहेत्यादि अमुकसगोत्रस्यामुक-
प्रेतस्य प्रेतत्वमेहनिन नवश्राद्धं करिष्ये॥ कुशोसि खं पवित्रोसि
ब्रह्मणा निर्मितः पुरा॥ प्राणिनोद्धरणार्थाय कुशाग्रं चि विष्णी
यते॥ इति कुशबटुं निधाय॥ कुशबटो नवश्राद्धे क्षण उपति-
ष्ठतां॥ पाद्यमुपतिष्ठतां॥ नवश्राद्धे अर्घमुपतिष्ठतां॥ आमान्न-
मुपतिष्ठतां॥ ततः पिंडस्थाने अवनेजनमुपतिष्ठतां॥ गोत्र०
नवश्राद्धे अयं पिंड उपतिष्ठतां॥ पिंडस्योपरि प्रत्यवनेजनं॥
उदकुंभ० पिंडस्योपरि हस्तं दत्वा अनादिनिधन इति श्लोकं
पठीत्वा अभिरम्यतामिति वदेत्॥ पिंडमाघ्राय स्नायात्॥
एवमेव नग्नप्रछादनश्राद्धं॥ तथैव पाथेयश्राद्धं॥ सोदकुंभं
श्राद्धमामान्नं सर्वत्र॥ एवं श्राद्धादि समाप्य॥ वस्त्राणि परि-
धाय सर्वैर्गोत्रजैः॥ स्नान वस्त्राणि सकृदेव निष्पीड्योदक-
दत्त्वा जिर्ह्व सस्तु चौदेद्यो त्वणवत्यां सर्वे उपविशंति॥ ततोप-
विष्टानां मन्येस्तु हृदः पुराणेतिहासकथाभिः संसारानित्यतां

॥२६॥

स्वापयंत॥ शोकापनोदं कुर्युः॥ ततो ब्राह्मणैरनुज्ञातास्ततउत्था
य पश्चाद्वल्लोकयंतो धोमुखाः कनिष्ठान अग्रे कृत्वा पपंक्तिभूतास्ता
व ग्रामं प्रत्यायांति॥ दिवा मृते अस्तमयादूर्ध्वं ग्रामं प्रविशंति॥
रात्रौ मृते सूर्योदयानंतरं॥ अथ ते ब्राह्मणैरनुज्ञातास्तदानी
मेव प्रविशंति॥ ततो गृहद्वारसमीपमागत्य त्रीणि निंबपत्राणि
दंतैर्विदश्याचम्य शमीपापं शमयत्विति शमीमालभंते॥ अ
श्मेव स्थिरीभूयासमित्यश्मानं॥ अग्निर्नः शर्म यच्छत्विति
ग्निं॥ तूष्णीमुदकं॥ गोमयं गौरसर्षपांस्तैलं॥ दूर्वाप्रवालान्व्य
वृषभं चैव यथाक्रममालभ्य ततः पादेन पाषाणमाक्रम्य गृहं प्रवि
शंति॥ अथ पुत्रादीनां नियमः॥ ब्रह्मचारिणो धः पृथक्शायि

॥२६॥

नोप्युपवेशिनः॥ परस्परमसंस्पृष्टा दानाध्ययनवर्जिता॥
मलिना अधोमुखाः सर्वभोगविवर्जिताः॥ अंगसंवाहनं के
शसंमार्जनं च कुर्वंतो न किंचन कर्म कुर्युर्नकरियेयुः स्वजाति
पाणयः शास्याद् एकरात्रं त्रिरात्रं वा उपवसेयुः॥ अशक्तावे
कान्नं ब्रीहियवादि विकारं क्षारलवणमाषान्नरपपायस
वर्जितं॥ पाणिपुटे मृन्मये पात्रे वा एकवारं क्रीत्वा कृतमश्नीतां दिवै
मेवलब्ध्वा यावद्दिनांते दिवैवाल्पमश्नीयुर्न रात्रौ॥ भोजनकाले
भक्तमुष्टिं दद्यात्॥ तदन्नं स्नातातपेन॥ भोज्यापात्रेन्नकाले
तभुक्तिमुष्टिं च निर्वपेत्॥ नामगोत्रेण संबुध्य परिस्था
पिन्यपत्रवत्॥ दशरात्र मेते नियमाः कर्तव्याः सर्वे दशरात्र

रा

पर्यंतमवनेजनं सर्वं कपिंडदानं प्रत्यवनेजनसहितं कर्त
व्यं॥ तामेव रात्रौ श्मशाने शरावे क्षीरोदके इत्यादि विहायसि
स्थापयेयुः॥ प्रेता अत्र स्नाहीति मंत्रेण॥ विशाखैश्वरादयस्तु
ध्यादयनिधानसामर्थ्यात्पात्रद्वयमिच्छंति॥ अस्मात्प त्र
त्रे पिब चेति॥ इति वैद्यनाथकृते प्रेतकृत्ये प्रथमदिन
॥२७॥ कृत्यं समाप्तं॥ अथास्थिसंचयनं लिख्यते॥ तत्तु हारिहरभा ॥२७॥
ष्ये॥ ब्राह्मणस्य चतुर्थेऽहनि पंचमे क्षत्रियस्य तु॥ नवमे वै
श्यस्य एकादशे शूद्रस्य॥ त्र्यहाशौचे द्वितीयेऽह्नि सर्वेषां॥
सद्यः शौचे तु दाहानंतरमेव॥ तथा च स्मृतिः॥ प्रथमेऽह्नि
तृतीये वा सप्तमे नवमे तथा॥ अस्थिसंचयनं कार्यं दिने तद्गो

त्रजैः सह॥ आह्ने॥ सद्यः शौचे तदैकाहे सद्यः संचयनं
भवेत्॥ त्र्यहाशौचे द्वितीयेऽह्नि कर्तव्यस्त्वस्थिसंचयः॥ त
त्रैव॥ चतुर्थे ब्राह्मणानां तु पंचमेऽहनि भूभुजां॥ नवमे वै
ला श्यजातीनां शूद्राणां दशमात्परमिति॥ चतुर्थी संचयनमि
ति कात्यायनः॥ स्मृतिरपि॥ श्मशानदेवतायागं चतुर्थे
दिवसे चरेत्॥ सुपक्वैर्भक्ष्यभोज्यैश्च पायसैः पानकै
स्तथा॥ फलैर्मूलैर्जलैर्नीरैश्च पक्वान्नैः [illegible] याद्देवता॥
इति तद्यथा॥ कर्ता गोचैलैःसह गंधपुष्पादिसामग्री
श्मशानं गत्वा तत्र स्नात्वा वल्यर्थं [illegible] मंसं निधाय कर्द

॥२८॥

मशेशालं पलाशपुटं। मीशास्वोदकं भादिकं स्थाप्यास्थि
संचयनं श्राद्धं करिष्ये ॥ पूर्ववच्छ्राद्धं संपादयामात्रं दत्वा
श्मशाने क्रव्यादमुखेभ्यो देवेभ्यो नम इति मंत्रेण गंधादिभि
रभ्यर्च्य मंत्रेण बलिं दद्यात् ॥ तत्र मंत्रः ॥ नमः क्रव्यादमुखे
भ्यो देवेभ्य इति सर्वदा ॥ यस्मिन् श्मशाने देवतास्तु भगवंतः
सनातनः ॥ ते स्म सकाशाद्गृही पर्व लि मत्ष्टांग मक्षयं ॥ प्रे
तस्यास्य शुभाल्लोकान् प्रयच्छंत्वपि शाश्वतान् ॥ अस्मा
कमायुरारोग्यं सुखं च ददतोक्षयं ॥ अनेन बलिं दत्वा वि
सर्जयेत् ॥ क्षीरमिश्रेणोदके नास्थि भस्मोपरि सिंचेत् ॥

॥२८॥

पालाशवृंतेनास्थीनि श्मशाद दक्षिणेन परिवर्त्य अंगुष्ठक
निष्ठिकाभ्यां पलाशपुटे स्थि ग्रहणं। तत्र यथा॥ व्र ह्मावि
ष्णाः कूर्च सहिता एकैकमस्थि पाद प्रभृति शिरः पर्यंतं
यथा भं गेन भवति पालाशपुटे निधयुः॥ सूक्ष्मास्थीन्य
पि सर्वं भस्म जले त्यजेत् ॥ स्मशानोशमी पत्राणि कूर्द
म से वाले क्षिपेत् ॥ अस्थीनि पंचगव्येन प्रोक्ष्य ॥ घृतेना
भ्यज्य ॥ कुंकुमाद्यैर्विलिंपयेत् ॥ ततः आग्नेयां दिशि ग्रामा
च्चित्तेर्ण काननवृक्षमूले स्तु चौदेशे वा गर्तं खात्वा कुशानां
स्तीर्य हरिद्रया रक्तवस्त्रखंडं वास्तीर्य वा ॥ तत्र अनेन मंत्रे

६४

॥२९॥

णा स्थीनि वस्त्रखंडे निक्षिपेत्॥ तथा च स्मृतिः॥ प्रेतस्या
स्थीनि गृह्णाति प्रधानाङ्गोद्भवानि च॥ पंचगव्येन संस्ना
प्य क्षौमवस्त्रेण वेष्टयेच्च॥ प्रक्षिप्य मृन्मये भांडे न संधीने
गुप्तौ॥ अरण्ये वृक्षमूले वा श्मशाने संस्थापयेदपि॥ गृही
त्वास्थीनि तत्स्मानीत्वा तोये वि निक्षिपेत्॥ अथ दशाह
स्यांतरे गंगादितीर्थे स्थिप्रक्षेपमाह गौतमः॥ दशाहाभ्यं
तरे यस्य गंगातोयस्थमज्जति॥ गंगायां मरणे यादृक्तादृ
क्फलमवाप्नुयात्॥ इति॥ अथ नयनप्रकारः॥ अजिनं
कंबलं दर्भा नीकेशाः शाणमेव च॥ कुशपत्रं तोलपत्रं सप्त

धा वेष्टनं स्मृतं॥ हिमं च मौक्तिकं रौप्यं प्रवालं नीलकं तथा॥
निक्षिप्यास्थिनि मध्ये तु शुद्धिर्भवति नान्यथा॥ ततो होमं प्र
कुर्वीत तिलाज्येन विचक्षणः॥ उदीरते तिसृभिर्ऋग्भिर्जुहुयाद् नेदष्टौ
न रंध्रातं॥ ततो गत्वा क्षिपेदस्थि स्पर्शदोषो न विद्यते॥ मूत्र
पुरीषवमनं कुर्वन्नास्थीनि धारयेदिति॥ अथास्थि
क्षिपेद्विपक्षे॥ चिन्हमेषं चिकिंश्चुर्गं चुंरवात्सी कुंभं न्नुधा
पर च न वस्यं कुराना स्नीर्यवामीत्यनेन मंत्रेणास्थिक्षेपं
यशा॥ वामनेस्तानोर्नैन वा चात्र लणात्र्याविद्यया प्र
त्यामक्षितायामपाद्र्सेरे निवपाम्यसौ॥ अत्र मंत्रार्मन्त्र
प्रेत निर्वपामीति वा॥ अत्रैव त्र्यादशाहं॥ यच्चानुसं

॥२९॥

श्मशानवासिने रुद्राय अयं पिंडमुपतिष्ठतामिति ।। अथो नरक ।।२
अदहनयते तथामंत्रं विधाय ।। पश्चाद्दनं वक्ष्यमाणा अन्यत्र
गत्वात्मानं कुर्युः ।। ततो गोमयोदकेन श्मशानभूमिमुपलि
प्य त्रिकोणां वेदिं कृत्वा हरिद्रादिनालंकृत्य तत्रोदकपूर्णकुं
भं तस्योपरि पिंडं दद्यात् ।। तद्यथा ।। अद्येत्यादि अमुकस्य
गोत्रायामुकप्रेताय भोजनार्थमयं पिंडः पानार्थमुदकुंभ
मुपतिष्ठतामिति भस्मोस्यकुशान्तिलक्षिपेत् ।। तस्य पश्चिमभा
गे श्मशानवासिनेभ्यः प्रेतेभ्यो पिंडमुपतिष्ठतां ।। एवं प्रे
तसखिभ्यो यं पिं० ततो दक्षिणतः प्रेतपायाय पिंड० ततः
क्रमेण तेषामुपरि तिलोदकं दद्यात् ।। ततः कालाय दहनपतये ।।

।।३०।।

मृत्यवे दहनपतये ।। यमाय दहनपतये ।। एतेषाम पित्रयाणां
क्रमेण पोलिका त्रयपादुका षट् कूष्म त्रयं च दद्यात् ।। यमस्त्रि
स्यामितीदमुपतिष्ठतामिति पोलिकादि दद्यात् ।। इत्यस्थिसं
चयनं ।। अथ द्वितीयदिनकृत्यं ।। पूर्वदिनकृत्यदेशं गत्वास्ना
त्वामुकगोत्रस्येत्यादि प्रेतस्य यत मुख्याप्रेतत्व विमुक्तयो च
म लोकप्राप्तये द्वितीये क्रिअवयवपूरक पिंडदानविधिं करि
ष्ये ।। तस्मिन्नेवात्मनि तिलतोयांजलित्रयं दद्यात् ।। हविषा
न्नेन तंदुलेन पायसेन गुडेन वा ।। प्रथमेहनि यद्व्यं तदेवस्या द्द
शाहिकमिति ।।१।। अद्येत्यादि अमुकप्रेतस्य चक्षुःश्रोत्र
नासा वपवत्मुखं निष्पत्त्यर्थं अपानवायुनिष्पत्तये चायं पिंड

उपतिष्ठतामिति अवनेजनपूर्वकं दर्भोपरि पिंडं दत्वा तिलोदकं
च। अनादिनिधनं इत्यादि श्लोकान् पठेत्॥ पिंडप्रवाहणस्नानं
यात्॥ एवं सर्वदिनेषु॥ अथ तृतीयदिनकृत्यं॥ स्नात्वा संक
ल्पं कृत्वा अश्मोपरि तिलांजलिपंचकं दत्वा अवनेजनपूर्वकं भुजौ
वक्षस्तनौ ग्रीवा व्यानवायुनिष्पत्तये अयं पिंडः॥ एवं पूर्ववत्स
रकं पिंडं दत्वा ह विस्तारायकुर्यात् बहुकृत्वा गोत्रमुच्चार्य तृतीये
ह्नि नवश्राद्धं करिष्ये॥ पूर्ववत्पिंडदानांतं विधाय अनादिनि
धन इति पूर्ववत्पिंडप्रवाहयेत्॥ अथ चतुर्थदिनकृत्यं॥ स्ना
त्वा संकल्पं कृत्वा अश्मोपरि सप्त तिलांजलीन् दद्यात्॥ गोत्रस्ये
त्यस्य कटि नाभि गुदलिंगावयव निष्पत्यर्थं समानवायुनि

॥३९॥

॥३९॥
ना

निष्पत्तये चतुर्थेह्नि अयं पिंडः पूर्ववत्प्रवाहणं॥ अथ पंच
मदिनकृत्यं॥ स्नात्वा संकल्पं कृत्वा अश्मोपरि नव तिलांजलीन्
दद्यात्॥ गोत्रस्येत्यस्य [illegible] ऊरु जंघावयव निष्पत्यर्थं उदान
वायुनिष्पत्तये च पिंडं अर्थ्य अवनेजनमुपति पूर्ववत्पिंडप्रवा
हणांतं कृत्वा स्नायात्॥ पुनः पाकं विधाय विषमश्राद्धं क्षणा
दि पिंडप्रवाहणांतं पूर्ववत्कुर्यात्॥ अथ षष्ठदिने कृत्यं॥
स्नात्वा संकल्पं कृत्वैकादश तिलांजलीन् दद्यात्॥ गोत्रस्ये
त्यस्य गुल्फपादांगुलि मर्माद्यवयव निष्पत्यर्थं नागवायु
निष्पत्तये च अवनेजनपूर्वकं पूर्ववत्पिंडप्रवाहणांतं कर्तव्यं
स्नानं च॥ अथ सप्तमदिनकृत्यं॥ पूर्ववत्स्नात्वा संकल्प्य अ

॥३२॥

लीन्त्रयोदशांदद्यात्॥ गोत्रस्येत्यत्र कास्थिमज्जा शिरोनयु
व निषस्यर्थं हस्त कृत्ला स वायु निष्पन्नये च अवनेजन पूर्वकं पि
ड प्रवाहणांतं कृत्वा स्नात्वा विषमश्राद्धपूर्ववत्कुर्यात्॥ अ
थाष्टमदिनकृत्यं॥ स्नात्वा संकल्पादिपिंडप्रवाहणांते विशे
षः॥ पंचदशांजलयः॥ नखलोमाद्यवयवकर्मवायुनिष्पत्त्य
र्थं० स्नानं॥ अथ नवमदिनकृत्यं॥ स्नानादिपिंडप्रवाहणांते
विशेषः॥ वीर्यसंभृत्यै देवदत्त वायुनिष्पन्नये च अयं पिंड० स्ना
त्वा विषमश्राद्धपूर्ववत्कर्तव्यं॥ अथ दशमदिनसंकृत्यं॥ निस्य
स्थानं गत्वा स्नात्वा तिलांजली षट्कोनविंशतिः क्षुत्पिपा
सानिष्पत्त्यर्थं धनंजयवायुनिष्पन्नये च अयं पिंड० पूर्ववत्सिंडदानं
यु

॥३२॥

स

तं विधाय किंचिद्दूरं गत्वा मृदा त्रिकोणां वेदिं कुर्यात्॥ ततो गोम
येन संमृज्य हरिद्रादिना लंकृत्य तत्र जलपूर्णं कुंभं पंचकं स्थापयेत्॥
तदुपर्येकैकं पिंडं अश्व अनुक्रमे गोत्राय अमुकप्रेताय क्षुत्पिपासानिवृत्त्य
र्थं सोदकुंभ भोज्यं पिंडमुपतिष्ठतामिति मध्यस्थे निवेदयेत्॥ प्रे
त सखिभ्य इति पूर्वस्थे॥ वैवस्वताय यमायेति दक्षिणस्थे॥ वा
यसेभ्य इति पश्चिमस्थे॥ प्रेताधिपतये इत्युत्तरस्थे॥ पिंडोपरि
तिलोदकं दत्वा॥ पादुकाछत्रपताकादि अस्येवं तेभ्यस्तेभ्य उपति
ष्ठतामिति दद्यात्॥ ततः पश्चिमदेशस्थं पिंडं यावद्वायसो न ता
वत्तिष्ठेत्॥ ततोऽस्मानं तैस्तैर्नाभ्यंज्य जले क्षिपेत्॥ किंचिदेतत्समु
च्चयेदादामानि नैति॥ पुत्रादीनां यथाचारं केशश्मश्रुवपनं

ता

॥२२॥

नखच्छेदनं कर्त्तव्यं ॥ स्त्रियाश्च ॥ तत्र देवलः ॥ आशौचांते कृते स्म
श्रुकर्माणास्तिलः सर्पिषैः ॥ स्नाताः शुक्लवाससो पि ग्रासनिरोयुस्त
थाग्रहं ॥१॥ दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ॥ तत्र त्या
ज्यानि वासांसि केशश्मश्रुनखानि च ॥ पुत्रः पत्नी च वपनं कु
र्यादं तेयथाविधि ॥ पिंडदाता चितोप्योपि कुर्याद्दिस्यं समाहितः इ
ति ॥ ततः सर्वे तिलामलकादिना स्नात्वा तद्गृहं गत्वा तत्र द्विवैव
भुंजीरन् ॥ द्विवै वाम्नुरिति कात्यायनस्मृत्यानात् ॥ इति वैद्यनाथकृ
तौ प्रेतकार्ये दशमदिनविधिः समाप्तः ॥ ॥ अथैकादशाहकृ
त्यं लिख्यते ॥ तत्र प्रातरुत्थाय मलांगनांत्यागः ॥ गृहलेपना
दिसंपंगः ॥ स्पृष्टवस्त्रसहितं सूर्योदयात्प्रागेव मौसलस्नानं

॥२२॥

कुर्युः ॥ तथा च स्मृतिः ॥ दशमपिंडमुत्सृज्य रात्रिशेषे शुचिर्भवे
दिति ॥ सूर्योदये जाते वै धस्नानं ॥ ततः सर्वैः पंचगव्यं संपाद्य प्राश
नं ॥ ततः कूर्चाहूतं मध्याह्निकौ च वृषोत्सर्गं कुर्यात् ॥ नाचार्यवरणं
स्वयमेव कर्ता ॥ एकादशाहि प्रेतस्य यस्य नोत्सृज्यते वृषः ॥ प्रे
तत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ नसभर्तृकामरणे वृषो
त्सर्गः कर्तव्यः ॥ तदुक्तं संग्रहे ॥ पतिपुत्रवती नारी भर्तुरग्रे मृ
ता यदि वृषोत्सर्गं न कुर्वीत गां तु दद्यात्पयस्विनीमिति ॥ ततो गो
ष्ठं देवालयं नदीतीरं गत्वा स्नात्वा प्राणानायम्य देशकालौ संस्मृत्य
ता मुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये
वृषोत्सर्गं करिष्ये ॥ हस्तमात्रं स्थंडिलं विधाय तद्दीने भागे ह

ब २

मु

त्तिमात्रां वेदिं कुर्यात्॥ तस्याश्चतुर्दिक्षु शमीनारवांनिधाय तत्प
श्चिमे पंचरत्नैर्वस्त्रगंधैरलंकृत्य वरुणमंत्रैः कलशं स्थापयेत्॥
तत्पूर्वदक्षिणपश्चिमोत्तरदिक्षु कलशमंत्रेणैरसीत्यादिभि
श्चतुर्णां कलशानां स्थापनं॥ सुत्रामाणमिति सूत्रेण वेष्टयेत्॥
बहिर्दध्यक्षतपुष्पमालादिभिरभ्यर्च्य॥ इमं मे वरुणेति चतुर्भि

र्मंत्रैः प्रार्थयेत्॥ कुष्ठं मांसी हरिद्रे द्वे वचा चंदनं दैशैलजं॥ कच्चुरं गोरो
चनं च मुस्तैस्ता ओषधीः स्मृताः॥ एताः सर्वौषधीश्च तन्मध्ये
क्षिपेत्॥ तत्र मंत्रः॥ ओषधीः॰ हिरण्यगर्भः समिति हिर
ण्य॥ एतान्यश्वत्थवटप्लक्षौदुंबरोतानां पंचपल्लवानि॥ अश्वत्थे
वइति पंचपल्लवान्॥ धान्यमसीति त्रीहियवसप्तधान्यं पूर्णपा

दि

ति

त्रावपं च वक्ष्यपूर्णा दर्वि इति कलशोपरि निधाय॥ याः फलिनी
रिति पुगीफलानि सुजातो ज्योतिषेति वस्त्रैर्वेष्टयेत्॥ वस्त्रंमौ
क्तिकं वैदुर्यं पुष्परागमिंद्रनीलं तानि पंचरत्नानि परिवाज
पतिरिति क्षिपेत्॥ शीतं वइति मंत्रेण गंधादिभिरभ्यर्च्य प्रार्थ
येत्॥ मंत्रस्तु॥ त्वयं हि मन्मया एता महातीर्थोदकान्विताः॥
वर्द्धमानसमोपेता भवंतु कुलवर्द्धकाः॥ गंगादिसर्वतीर्थानि
गुह्यक्षेत्राणि सर्वशः॥ तानि सर्वाणि कुंभेऽस्मिन्विशंतु ब्रह्मल
शासनात्॥ स्थिरो भवेति हस्ताभ्यां कलशान्स्थिरीकृत्य मे
ध्यकलशोऽस्य अपारं भवसंगोत्कुर पूजाविधिं कुर्यात्॥ ततो समा
प्यनंतरं वृषोत्सर्गां गभस्तं प्रेतमान्यपूजां कुर्यात्॥ नांदीश्रा

पूर्वे ब्रह्माणं॥ दक्षिणे यमं॥ पश्चिमे अनंतं॥ उत्तरे विष्णुं स्थाप्य पूजयेत्॥

॥३५॥

ग्राभावः॥तद्यथा॥श्रीरुद्रजीस्यर्थंप्रेतमातृस्थापंकरिष्ये॥
कराल्यैनमः॥कराली माआवाहयामि॥गंधादिभिः संपूजयेत्॥एवं सर्वत्र॥भीषणां॥भद्रां॥विकराचां॥व्याघ्रीमां॥भयां॥उत्कटां ७॥बहुकालीं ८॥चंडां ९ इति प्रेतमातरः॥ततो पंचभूसंस्कारानन्तरं स्वाग्नेः स्थापनं॥ब्रह्मोपवेशनं क्षीरपाकश्रपणं तंदुलानंतरं पौष्ट्रचरोः स्विष्टस्यासादनं॥क्षीरेणपाय समश्रपणं॥समिदाधानांतंविधायाज्येनषडाहुतीर्जुहुयात्॥इह रतिस्वाहा॥इदं पर्ण्यै॥ इति चतुर्णां द्वयोरग्नये इतित्यागः॥इदमग्नय इति सर्वेषां॥इह रमध्वं स्वाहा २ इह धृतिस्वाहा ३ इह स्वधृतिस्वाहा ४ उपसृजं धरुणं मात्रे धरुणो मातरं धयन्स्वाहा ५ रायस्पोषमस्मासु दीधरत्स्वाहा॥
इदमग्नये न मम॥६॥आज्यभागाविष्ट्वा पायसेन वाहुतीर्जुहुयात्॥अग्नये स्वाहा॥इदमग्नये १ यथादैवतं त्यागः॥रुद्राय २ शर्वाय ३ पशुपतये ४ उग्राय ५ अशनये ६ भवाय ७ महादेवाय ८ ईशानाय ९ ततः पौष्ट्रचरुमभिघार्य॥पूषागा अन्वेतुनः पूषारक्षत्वर्वतः॥पूषा वाजं सनोतु नः स्वाहा॥इदं विष्णवे न मम॥पायसपौष्ट्राच्चरोः स्विष्टकृतं हुत्वा नवाहुतीर्जुहुयात्॥होमशेषं समाप्य रुद्रांजपित्वाऽमंडपाद्बहिःस्थितं च तस्याभिर्वत्सतरीभिर्हविष्यां वैकया वा युतं सर्वांगेरुपेतमेकवर्णं वाराहितं वा यथेरूपस्थितमंजीवदत्त्वाऽऽवाः पाय

॥३५॥

धा २

पूर्णो ८

न

स्विन्याः कुत्रमेवं गुणान्वितशिष्टं वृषं पश्चिमद्वारेण मंडपमध्ये
आनीय वेदिपुरतः स्थापयेत्॥ कात्यायनसूत्रोक्तेन स्त्रोव
त्सतर्यः द्वे वैका वा॥ तथा च स्मृतिः॥ चतस्रो वत्सिका भद्रा दैवै
कोसंभवेपि वेति॥ यत्तु पठंति॥ वृषोत्सर्जनवेलायां वृषोभा
वे कथंचन॥ म्रद्भिः पिष्टैश्च दर्भैर्वा वृषं स्नात्वा विमोचयेत्॥ न
शक्यते वृषोत्सर्गे होमं वा तत्र कारयेत्॥ तन्निमर्ल्लमिति नि
॥३६॥ र्णयसिंधौ॥ ततो वत्सतरीमध्यस्थं पंचपल्लवयुक्तकुंभान्
ब महीद्यौः कूत्रोदकैर्वृषमभिषिंचेत्॥ आपोहिष्ठेति तिसृभिः॥
त्रातारमिंद्रेति पंचेंद्रियैः॥ इमं मे वरुणेति च तसृभिः॥ पंच
वारुणैश्च॥ श्वगाप्रजोतः॥ इदमापः पुनंतु मेति नवभिः॥ आ

न प्यायस्वा पंचनद्यः स्त्वोमिद्भिर्हवामह इति वामदेव्येन॥ यद्देवादेव
हेडनमिति कूष्मांडैः॥ शन्नोदेवीरिति पुण्यमंत्रैरभिषिंचेत्॥ ततो
वृषभस्य वामकटिभागे कुंकुमेन चक्रं लिखेत्॥ दक्षिणबाहौ त्रि
शूलं विदध्यात्॥ वृषभमंकयेति लोहकारं प्रति वदेत्॥ ततो लोहका
रस्तु लोहेनाग्नितप्तेनांकयेत्॥ स्त्रमताचांकयेत्॥ ततो वृषदेहे
दैकादशनामन्यासं कुर्यात्॥ तत्रायं क्रमः॥ अघोराय नम इति दक्षि
णपादे॥ पशुपतये॰ वामपादे॥२॥ शर्वाय॰ दक्षिणजानुनि॥३॥ विरूपा
य॰ वामजा॰४ विश्वरूपाय॰ दक्षिणकट्यां॥५॥ त्र्यंबकाय॰ वामक॰६॥
कपर्दिने॰ दक्षिणकरे॥७॥ भैरवाय॰ वामक॰८॥ शूलपाणये॰ दक्षि
णांसे॥९॥ ईशानाय॰ वामांसे॥१०॥ महेशाय नमः॥ मूर्ध्नि॥११॥ एवं न्या

संविधाय वृषरुद्ररूपं ध्यात्वा वत्सतरीणां नामानि कुर्यात् ॥ मंत्र
क्रमः ॥ पार्वत्यै नमः ॥ गौर्यै नमः ॥ कालिंद्यै नमः ॥ क्रोट्यै । देकपर्द्यै
अनेनैव क्रमेण ॥ अथ वत्सतरीन्यासः ॥ भगवत्यै नमः इति दक्षि
णपादे ॥१॥ उमायै । वामपा० ॥२॥ रुद्रप्रियायै नमः दक्षिणजानुनि ॥३॥
पार्वत्यै नमः वामजा० ॥४॥ गौर्यै । दक्षिणकट्यां ॥५॥ काल्यै । वाम० ॥६॥
कालिंद्यै । दक्षिणकरे ॥७॥ कोट्यै । वाम० ॥८॥ विश्ववारिण्यै । दक्षि
णांसे ॥९॥ गंगायै । वामांसे ॥१०॥ शिववल्लभायै नमः मूर्ध्नि ॥११॥ इ
ति वत्सतरीणां प्रत्येकं न्यासं विधाय वृषं वत्सतरीणां ललाटे कुंकु
मेनार्द्धचंद्राकृति तिलकान् कुर्यात् ॥ तस्योपरि गंधपुष्पाक्ष
तैरलंकृत्य वत्सतरीणां शिरसि सिंदूरं चोपलिप्य वृषभस्य कर्णे

पितानोसि इमं मंत्रं जपेत् ॥ ततो वृषभं प्रार्थयेत् ॥ नंदिनिकुलसं
भूतो वृषत्वं रुद्रवाहनः ॥ गवां कोटिसहस्राणां सोतु त्वं वृषभस्त
था ॥ पितृमातामहा भ्रातृमातामहास्तथैव च ॥ रौरवे नरके चै
व तेषां रक्ष गवां पते ॥२॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः ॥
अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥३॥ इति वृषभं संप्रा
र्थ्य नयजयश्च गवान् महावृषेत्पुच्छे वदेत् ॥ ततः कन्यां वत्सतरी
णां समर्पणं तापठेत् ॥ वत्सतर्यो रूपवत्यः पतिं वो बलिनं शुभं ॥
दास्यामि तेन सहिता क्रीडध्वं हृष्टमानसा इति ॥ वृषभं गत्वा ॥
वृषोसि भगवान् धर्मश्चतुष्पादः प्रकीर्तितः ॥ तं प्रार्थयाम्यहं भ
क्त्या स मां रक्षतु सर्वत इति ॥ प्रार्थनां कृत्वा प्राणानायम्य देश

कालेस्मिन्स्वत्रामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये स्वर्गलो
कप्राप्त्यर्थं वत्सतरीसहितं वृषोत्सर्गं करिष्ये॥ इति संकल्प्य सकु
शजलं गृहीत्वा भूमौ क्षिपेत्॥ एवं युवानं पतिवो ददामि तेन क्री
डंतीश्चरथ प्रियेण॥ मा नः समजनुषा स्तु भगाराय स्पोषेण स
मिषा मदेम स्फस्तजेत्॥ वृषभस्य दक्षिणपादे वत्सतरीणा
वामपादे कूर्कूणबंधनं॥ ततस्तं वत्सतरीमध्यस्थं मयोभूरसि स्य
नुवाकशेषेणाभिमंत्रयेत्॥ मयोभूरभिमा वाहि स्वाहा॥ माहू
तोसिमरुतामित्यारभ्य स्वर्णज्योतिः स्वाहा स्वर्णस्य र्यस्वाहेत्ये
तदंतानुवाकशेषः॥ ततो यजमानः स्वाचांतः पवित्रपाणिः प्राणा
नायम्य देशकालौ संकीर्त्य वृषोत्सर्गांगभूतं देवर्षिमनुष्यपितृतर्प

॥३८॥

णमहं करिष्ये॥ इति संकल्प्योदङ्मुखो भूत्वा देवतीर्थेन पुष्पो
परि मंत्रांते तर्पणं कुर्यात्॥ तत्र मंत्रक्रमः॥ ब्रह्माद्या देवताः सर्वे
ऋषयो मुनयस्तथा॥ असुरा देवपत्न्यश्च मातरश्च ततः स्मृताः॥
दिक्पाला लोकपालाश्च ग्रहदेवाधिदेवताः॥ ते सर्वे तृप्तिमायांतु
नीलपुच्छेषु तर्पिताः॥ विश्वेदेवास्तथादित्याः साध्याश्चैव मरुद्गणाः॥
क्षेत्रपीठोपपीठानि नदानद्यश्च सागराः॥ ते सर्वे तृप्तिमायांतु वृ
षपुच्छेन तर्पिताः॥ पाताले नागपत्न्यश्च नागाश्चैव सपर्वताः॥ पिशा
चा गुह्यका प्रेता गणा गंधर्वराक्षसाः॥ ते सर्वे तृप्तिमायांतु वृ०॥
वृक्षिव्यापस्तथा तेजो वायुराकाशमेव च॥ दिवि भुव्यंतरिक्षे च ये
च पातालवासिनः॥ ते सर्वे तृप्तिमायांतु वृ० कपिलः शेषनागश्च तक्ष

कोनंतएवच॥तेसर्वेतृप्तिं॰अन्येजलचराजीवाअसंख्यातास्थने
कृताः॥चतुर्दशयमाश्चैवयेचान्येयमकिंकराः॥तेसर्वे॰पक्षिरक्षा व
क्षिराजानःपक्षिणःपशवस्तथा॥स्वेदजाउद्भिज्जाजीवाअंडजाश्च
जरायुजाः॥त्रांतिदाःशुभदास्तेस्युःवृषपुच्छेचतर्पिताः॥इतितर्पणं
विधायापसव्येकृत्वादक्षिणामुखःपितृतीर्थेनवृषपुच्छोपरि
॥३१॥ नामगोत्रोच्चारपूर्वकंस्वपितृतर्पणंविधायश्लोकरूपमंत्रैश्चत ॥३१॥
र्पणंकुर्यात्॥तत्रायंक्रमः॥आब्रह्मस्तंभपर्यंतंयेचान्येगोत्रिणास्त
था॥तेसर्वे॰आमगर्भेमृतायेचबीरास्त्रपाताश्चयेपिच॥संस्कार
रहितायेचरौरवादिषुगामिनः॥तेसर्वे॰सर्पव्याघ्रहतायेचशृंगी
दंष्ट्राजलाग्निभिः॥अपुत्राअक्रियायेचअदाराधर्मवर्जिताः॥

तेसर्वे॰आब्रह्मस्तंभपर्यंतंदेवर्षिपितृमानवाः॥तृप्यंतुपितरः
सर्वेमातृमातामहादयः॥अतीतकुलकोटिनांसप्तद्वीपनिवासि
नां॥आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं॥पितृवंशेमृतायेच
मातृवंशेचयेमृताः॥गुरुश्वशुरबंधूनांयेचान्येबांधवामृ
ताः॥तेसर्वे॰मातृपक्षाश्चयेकेचिद्येचान्येपितृपक्षजाः॥गु
रुश्वशुरबंधूनांकुलेयत्रसमुद्भवाः॥येप्रेतभावमापन्नायेचान्ये व
श्राद्धवर्जिताः॥वृषोत्सर्गेणतेसर्वेलभंतांगतिमुत्तमामिति॥
इतिपितृतर्पणं॥ततोलोहकारमाहूयतस्मैताषकारकंवेतनंदद्यात्॥
ततोबहुलतोयतृणगोसमूहेवत्सतरीसहवृषभंक्षिपेत्॥ततो
वृषोत्सर्गकर्त्तानिर्जनेवनेयेनकेनापियत्किंचिदुत्सृष्टेतद्येनबृन

सर्वप्रकारेणसंरक्षणीयमितिअन्योन्याब्राह्मणाप्रतिवच्यंतते॥
ब्राह्मणौगोपंप्रतिवक्तव्यं॥ततोगोपतौनिवृत्तेब्राह्मणैःस्वस्तिवा
चनंकारयित्वातेभ्योदक्षिणांदद्यात्॥पयस्विनींगांदद्यात्॥कृष्णां
श्चा॥इतिवृषोत्सर्गः॥६॥तस्मिन्नेवदिवसेषष्ठंविषमश्राद्धंकुर्या
त्॥तदेकोद्दिष्टविधिनापाकेनैवाशौचनिवृत्तेब्राह्मणेपावकेवा
कुर्यादमंत्रवत्॥स्मृतिरपि॥नवश्राद्धममंत्रंचपिंडोदकविवर्जि
तमिति॥पिंडोकंदेशंघृतामित्यादि॥लघुहारितः॥एकोद्दिष्टंतु
कुर्वीतपाकेनैवसदास्वयं॥अभावेपाकपात्राणांतदहःसमुपोष
णमिति॥गोभिलः॥ब्राह्मणंभोजयेदाद्येहोतव्यमनलेथवा॥
पुनश्चभोजयेद्विप्रंद्विरावृत्तिर्भवेदिति॥तत्राग्निपक्षेपंचभूसं

॥४०॥

स्कारपूर्वकंअग्निस्थापनं॥ततःआचम्यप्राणानायम्यदेशका
लौस्मृत्वागोत्रस्यप्रेतस्यप्रेतत्वविमुक्तयेउत्तमलोकप्राप्तये
नवश्राद्धमेकोद्दिष्टविधिनाहंकरिष्ये॥तत्रसपिंडीकरणात्प्रा
क्एकोद्दिष्टेषुसर्वेषुअष्टादशपदार्थानभवंति॥तदुक्तंरत्ना
वल्यां॥आशिषोद्विगुणादर्भाजपाशाःस्वस्तिवाचनं॥पि
तृशब्दःस्वसंबंधःशर्मशब्दस्तथैवच॥१॥पात्रालंभोव
गाहश्चउल्मुकोल्लेखनादिकं॥तृप्तिप्रश्नश्चविकरःशेषप्रश्नो
स्तथैवच॥२॥प्रदक्षिणाविसर्गश्चसीमांतगमनंतथा॥अ
ष्टादशपदार्थाश्चप्रेतश्राद्धेविवर्जयेदिति॥३॥ततोगोत्रं॰प्रे॰
नवश्राद्धेप्रेतस्थानेत्वामहंमामंत्रयेआमंत्रितोस्मीतिप्रतिवचनं॥

गोत्र॰प्रे॰ इदं ते पाद्यं॰ गोत्र॰प्र॰ आस॰ अर्घपात्रे जलं तिला
न् पवित्रं पुष्पं च प्रक्षिपेत्॥ गोत्र॰प्रे॰ एष ते अर्घ उपतिष्ठतां॥
अस्मिन्नवसरे गंधादिदानं॥ अग्नौकरणाभावः॥ नाग्नौक
रणमिष्यते क्वचित्॥ ततो न्नपरिवेषणं॥ ततः प्रोक्षणं॥ गाय
त्र्या॥ इदमन्नं यथोपस्कारं गोत्राय प्रेताय उप॰ आचमनी
यं विप्रकरे देयं॥ ततः प्राणाय स्वाहेत्याद्याहुतयो श्राद्धपक्षे

॥८१॥ ण ॥८१॥

भवंति॥ अग्निपक्षे तु संकल्पितस्यान्नस्य कृदीरिते सप्ट अ
ग्निः प्रणवाद्यैः स्वाहाकारैस्त्वनुरावसाधितं रात्रौ स्वाहे
तव्याः॥ तत्त्मान्नशास्त्राद्विप्रकरे अन्नं दत्वा भुंजापयेत् मौरवीरि
करणोल्मुकं विना पिंडदानं कुर्यात्॥ गोत्र प्रे॰ यद्दत्तमेकोद्दि

ष्टश्राद्धे यमन्नमुदकमुपतिष्ठतां॥ अस्मिन्नक्षय्योदकदा
नेपदानं॥ तद्यथा॥ आसनोपानहौ छत्रमुद्रिका च कमं
डलुः॥ भोजनं भोजनाधारो वस्त्राण्यष्टविधं पदं॥ एकोद्दिष्ट
श्राद्धसांगुण्यार्थं इमां दक्षिणां उपतिष्ठतु॥ इत्येकोद्दिष्टश्रा
द्धं॥ एतस्यैव नाम इह एकोद्दिष्टमाद्यमासिकमिति॥ छ॥ अ
थ शय्यादानं॥ भविष्ये॥ तस्मात् शय्यां समासाद्य सारदारुम
याद्दृढां॥ दंतपत्रोल्वितां रम्यां हेमपट्टैरलंकृतां॥ हंसतूलीप्रति
च्छन्नां शुभगंडोपधानिकां॥ प्रच्छादनपट्टीयुक्तां गंधधूपादि
वासितां॥ तत्र संस्थापयेद्धैमीं हरिं लक्ष्म्या समन्वितौ॥ अ
थ हरिस्थाने प्रेतं॥ उच्छीर्षके घृतभृतं कलशोपरि कल्पयेत्॥

तांबूलं कुंकुमाक्षोदकर्पूरागरुचंदनं॥ दीपकोपानहछत्रचा
मरासनभोजनं॥ पार्श्वे सुस्थापयेच्छय्यासमंतान्यानि चै
वहि॥ मंत्रस्तु॥ यथा न कृष्णशयनं शून्यं सागरजातया॥ श
य्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥ यस्मादशून्यश
यनं केशवस्य शिवस्य च॥ अर्द्धत्वं देव॥ दत्त्वैवं तस्य सकलं प्र
णिपत्य विसर्जयेत्॥ एकादशाहे पितथा विधिरेष प्रकीर्ति ॥४२॥
तः॥ इति शय्यादानविधिः॥ अथ मासिकान्युच्यंते॥ ता
नि च मासिकानि द्वादशमासेषु षोडश भवंति॥ यथा॥ मरण
मासादारभ्य संवत्सरसमाप्तिपर्यंतं प्रतिमासं विधायमा
नानि द्वादश मासिकानि॥ ऊनमासिकं त्रैपक्षिकं ऊनषण्मा

सिकं ऊनाब्दिकं चेति॥ तदाह जातूकर्ण्यः॥ द्वादशात्र तु मास्या
नि आद्यषाण्मासिके यथा॥ त्रैपक्षिकाब्दिकं चेति श्राद्धान्येता
नि षोडशेति॥ अथ द्वादश प्रतिमास्यानीत्यभिधानाद्यषा
ण्मासिकाब्दिकशब्दाभ्यां ऊनमासिकोनषाण्मासिकोनाब्दिकरूप
रा:॥ अत्रोनमासिकादीन्यूनमासिकादिषु कार्याणीत्युक्तं॥
तत्किंपक्षदिनैरूनेषु कार्याणीत्यत्रोच्यते॥ तदाह गालवः॥ त्रि
भिर्वा दिवसैरूने त्वेकेनाह्नापि येन वा आद्यादिषु च मासेषु कु
र्यादूनाब्दिकं तथेति॥ एतानि षोडशश्राद्धानि सपिंडीकरणा
त्पूर्वमेकोद्दिष्टविधिना कुर्यात्॥ स्मृतिरपि॥ श्राद्धानि षोडशा
दत्त्वा नैव कुर्यात्सपिंडितामिति षोडशश्राद्धाकरणे सपिंडिकर

॥४३॥

णेधिकाराभावात्॥ सपिंडिकरणादूर्ध्वं तत्प्रत्याब्दिकवत्
पार्वणमेकोद्दिष्टं वा यथाचारं कुर्यात्॥ तदाह पैठीनसिः॥
सपिंडिकरणादूर्ध्वं कुर्याच्छ्राद्धानि षोडश॥ एकोद्दिष्टविधाने
न कुर्यात्सर्वाणि तानि तु॥ सपिंडिकरणादूर्ध्वं यदा कुर्यात्तदा
पुनः॥ प्रत्यब्दं यथा कुर्यात्तथा कुर्यात्सुतोऽपि ताः॥ अत्रापि
आद्यमासिकमेकादशेऽह्न्येव कुर्यात्॥ तदाह याज्ञवल्क्यः॥
मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरं॥ प्रतिसंवत्सरं चैवमाद्य
मेकादशेऽहनि॥ अत्र प्रतिमासं प्रतिवत्सरं चेत्युक्त्या आद्यमे
कादशेऽहनि॥ स्पष्टमेवोक्तं आद्यमासिकमाब्दिकं चैकादशेऽहनि
कुर्यात्॥ अनेनापि प्रायेण गोभिलो[illegible] आद्यस्य द्विरावृत्ति

॥४३॥

माह॥ ब्राह्मणे भोजने दाद्ये होतव्यमनलेऽथवा॥ पुनश्च भो
जयेद्विप्रं द्विरावृत्तिर्भवेदिति॥ अतो आद्यमासिकस्य द्विरा
वृत्तिर्भवति॥ अथ प्रयोगः॥ स्नात्वा षोडशब्राह्मणान्निमं
त्र्य कृतमध्याह्निकः षोडशपाकान्निष्पाद्य दाशान्तौ दर्भमात्र
स्वेदं कृत्वा श्राद्धोपक्रमं कुर्यात्॥ तदशान्तौ आमेन॥ अद्येहेत्या
दि गो० प्रे० द्वादशाहे सपिंडिकरणार्थं अपकृष्यैकादशेऽहनि
द्वादशे वा अन्नेनामान्नेन वा एकोद्दिष्टविधिना तंत्रेण करिष्ये॥
तत्र गो० प्रे० आद्यमासिकश्राद्धे क्षण उपतिष्ठन्तु॥ गोत्र० प्रे०
ऊनमासिकश्राद्धे क्षण० गो० प्रे० द्वितीयमासिकश्राद्धे क्षण० ३ गो० प्रे०
त्रैपक्षिकश्राद्धे क्षण० ४ गो० प्रे० तृतीयमासिकश्राद्धे क्षण० ५ गो० प्रे०

॥४४॥

चतुर्थमासिकश्राद्धेक्ष०६ गो० प्रे० पंचममासिकश्राद्धेक्ष०७
गो० प्रे० षष्ठममासिकश्राद्धेक्ष०८ गो० प्रे० ऊनषण्मासिकश्रा
द्धेक्ष०९ गो० प्रे० सप्तममासिकश्राद्धेक्ष०१० गो० प्रे० अष्टममा
सिकश्राद्धेक्ष०११ गो० प्रे० नवममासिकश्राद्धेक्ष०१२ गो० प्रे० द
शममासिकश्राद्धेक्ष०१३ गो० प्रे० एकादशमासिकश्राद्धेक्ष०१४
गो० प्रे० द्वादशमासिकश्राद्धेक्ष०१५ गो० प्रे० ऊनाब्दिकश्राद्धे
क्षण उपतिष्ठंतु॥ इमानि षोडशश्राद्धानि यदा सपिंडीकरणं सं
वत्सरे भवंति तदा स्वस्वकाले भवंति॥ चेन्मरणमासादा
दशमासमध्ये मलिनमासस्तदा तन्मासिकं द्विवारं कार्यं॥
एवं सप्तदशश्राद्धानि भवंति॥ एवं आसनानि दत्वार्घपात्रा

॥४४॥

णि गंधपुष्पादिनार्चयेत्॥ ततोऽन्नपरिवेषणादि जलदानांतं कृ
त्वा पिंडदानं कुर्यात्॥ अक्षय्योदकदानं चाद्वाकालकर्तृके केवला
नंत्रेण कार्याणि॥ पितुराशौचमध्ये माता यदि मृता अन्यो वा मातु
राशौचमध्ये म्रियते पिता तदा पितुराशौचांते मातुः पक्षिणीं कुर्या
त्॥ मातुः पक्षिणीमध्ये पितुरेकादशाहं कुर्यात्॥ तथा च स्मृतिः॥
आद्यश्राद्धमध्ये शुद्धोऽपि कुर्यात् द्विदेवोऽहनीति॥ इतरस्य तु आशौचे
नैव शुद्धिः॥ शंखोऽप्याह॥ माता यदि प्रमीता या मशुद्धो म्रियते पिता॥
पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति॥ इति वैद्यनाथ
कृतौ श्रेकूकाश्यां मे एकादशदिनकृत्यं समाप्तं॥ ॥६॥ अथ सपिं
डीकरणं॥ स्मृतिमतान्तरस्याष्टौ कालाः भवंति॥ कात्यायनमतात्त्व
वं

यः कालः ॥ तदुक्तं कालादर्शे ॥ एकादशो द्वादशो वा त्रिपक्षे च त्रिमासि
च ॥ षष्ठे चैकादशे वाब्दे संपूर्णे वाथ आगमे इति ॥ यद्वै विवाहाद्या
भ्युदयिकं प्राप्तं ततः पूर्वं सपिंडीकरणं कुर्यादित्यर्थः ॥ कात्यायनस्तु ॥
संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येतेति ॥ ए
षु चैकादशाहरूपः कालः कर्तरि पुत्रे सानौ एकादशाह दिवसे
स तिदर्शे स्यात् ॥ तदाह कार्ष्णाजिनिः ॥ सपिंडीकरणं कुर्यान्न पूर्वं
वत्साग्निमान् सुतः ॥ परतो दशरात्राच्चेत्कुर्याद्वीपरीतर इति ॥
दशरात्रात्परत एकादशेऽह्नीत्यर्थः ॥ इतरो निरग्निकः ॥ वृद्धवशिष्ठो
पि ॥ प्रथमो स्याद्मावास्यामन्ताहाद्दशमेहनि ॥ सपिंडीकरणं
तत्र कुर्याद्वै वसुतोऽग्निमानिति ॥ अत्रापि पंचमीमर्यादाया ॥ म

॥ ५५ ॥ ॥ ५५ ॥ व २

ताहाद्पूर्वं दिनामारभ्येत्यर्थः ॥ सामनेरेकादशो ह्निदर्शीपाते पिं
डपितृयज्ञार्थं पूर्वं सपिंडीकरणविधानं ॥ प्रेते अनग्नौ पुत्रे क
र्तरी अनग्निमान् द्वादशाहेपि कालः ॥ तदुक्तं विज्ञेश्वे ॥ यजमा
नोग्निमान्नराजन्प्रेतश्चानग्निमान् भवेत् ॥ द्वादशाहे तदा कार्यं
सपिंडीकरणं सुतैरिति ॥ यजमानकर्ताकनोः कर्तर्ये नग्नौ प्रेता
याहिताग्नौ तृतीयः पक्षः कालः ॥ तदाह सुमंतुः ॥ प्रेतस्याहिता
ग्निः स्यात्कर्तानग्निर्यदा भवेत् ॥ सपिंडीकरणं तस्य कुर्यात्स
क्षेतृतीयक इति ॥ अनग्नीनां तु द्वादशाद्या सम कालाभेवेति ॥
परितं इत्यनग्नेः संवत्सराद्पूर्वं कार्ष्णाजिनिवचनात् सपिंडीकर
णविधानं कथं सम कालादिति चेत् ॥ सत्यं ॥ सपरमुख्यः कालः ॥

र

नी २

॥४६॥

तत्र देशकालादिस्वास्थ्यानिश्चयात् ॥ द्वादशाह एव कार्यं ॥ त
दाह व्याघ्रः ॥ आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ॥
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ॥ इति द्वादशेहनि वा
वसपिंडीकरणं कार्यं ॥ तत्र प्रयोगः ॥ देवब्राह्मणौ द्वौ पित्र्या
र्थान् त्रीन् प्रेतार्थमेकं निमंत्रयेत् पूर्ववद् ध्रुवा ॥ अपरेद्यु ब्राह्म
णानां श्मश्रुकर्माभ्यंगं कारयित्वा श्राद्धमारभेत् ॥ अद्येहेत्या
दितिथौ गोत्रस्य प्रेतस्य प्रेतलोकात्पितृलोकप्राप्त्यर्थं अमु
कगोत्राऽमुकशर्मभिर्वसुरुद्रादित्यस्वरूपैस्तत्पितृपितामहप्रपि
तामहैः सह सपिंडीकरणपार्वणैकोद्दिष्टविधिनाहं करिष्ये ॥ तत्र
कालकामसंज्ञिकानां विश्वेषां देवानां स्थाने त्वामहमामंत्रये ॥

आमंत्रितोस्मि ॥ एवं द्वितीये ब्राह्मणे ॥ अमुकगोत्रस्यामुकशर्म
णः पितामहस्थाने त्वामहमामंत्रये । आमंत्रितोस्मि ॥ एवं प्रपि
तामहवृद्धप्रपितामहयोः ॥ गोत्रस्य० प्रे० स्थाने क्षणः० एवं ब्रा
ह्मणविन्यासस्तु सूत्रानुरोधेन लिख्यते ॥ त्रिणि पितृणामे
कं प्रेतस्येति ॥ अमुमेव क्रमं शातातपो व्याह ॥ सपिंडीकरणं श्रा
द्धं दैवपूर्वं नियोजयेत् ॥ पितॄनेवाशयेत्तत्र पुनः प्रेतं च निर्दि
शेत् ॥ एवकारो मातामहस्य व्यवच्छेदार्थः ॥ अन्यच्च ॥ दत्वा पिंडं
न्पितृभ्यस्तु पश्चात्प्रेताय पार्थिवे ॥ तं तु पिंडं त्रिधा कृत्वा आ
नुपूर्व्याच्च संततमिति ॥ तस्मात्सपश्चाद्दैकोद्दिष्टं ॥ एवं षष्ठ्यंतेनै
वासनानि दद्यात् ॥ कालकामसंज्ञकानां विश्वेषां देवानां वो हविषे ॥

॥ प्रेत ॥
॥ ४७ ॥

आवाहयेत्यनुज्ञातः विश्वेदेवास आगतेति मंत्रेणावाह्य ॥ वि
श्वेदेवाः शृणुतेममिति जपेत् ॥ अमुकसगोत्रात् पितामहप्रपिता
महरूद्रप्रपितामहान् ॥ अमुकामुकशर्मणः वसुरुद्रादित्यस्व
रूपान् आवाहयिष्ये ॥ आवाहयेत्यनुज्ञातः ॥ उशंतस्त्वेत्यावा
ह्यावकीर्य तीलान् ॥ आयंतु न इति जपेत् ॥ प्रेतब्राह्मणे नावाह
नं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्न उपति
ष्ठतामिति अक्षय्यस्थाने अभिरम्यतामिति विसर्गं ॥ इत्येकोद्दि
ष्टं ॥ देवार्थमर्घ्यं प्रागग्रं ॥ पित्रार्थान् दक्षिणसंस्थान् दक्षिणा
ग्रान् त्रीनर्घ्यान् स्थापयेत् ॥ प्रेतार्घ्यमेकं तदग्रे स्थापयेत् ॥
तत्र कुशाश्चतुष्टयं च ॥ सपवित्रे षर्घपात्रेषु शन्नोदेवीरित्येकै

॥ काशी ॥
॥ ४७ ॥

कस्मिन्नप आसिंचति ॥ एकैकस्मिन्नेव तिलानावपति तिलोसी
ति मंत्रेण ॥ एवं सतिलगंधोदकानि सर्वाणि पात्राणि पूरयित्वा ॥
यादिव्येति पठित्वा कालकामसंज्ञक विश्वेदेवा एष वो र्घ इति प्र
योगेण देवब्राह्मणहस्ते सपवित्रके र्घ्यं सशेषं क्षिपेत् ॥ अस्त्व
र्घ्यमिति प्रतिवचनं ॥ एवं द्वितीयब्राह्मणं ॥ एवमेव प्रयोगेण
गोत्रोच्चारसर्वकं तत्पित्रादित्रयाणां सशेषमर्घ्यं दत्वा ॥ तथै
व प्रेतब्राह्मणायार्घजलं दत्वा वशिष्ठं जलं तत्पात्रमलैः स
ह संयोजयेत् ॥ अत्रैतत्संदिश्यते ॥ प्रेतपात्रात्पितृपात्रेषु सिं
चतामिति ॥ प्रेतशब्देनापचतुर्थः ॥ पुरुष उत स्योन्तरति ॥
प्रकर्षेण इतः प्रेतत्वस्य स्यापुनर्नागमनात् चतुर्थ एव ॥ ...

॥प्रेत॥
॥४८॥

यद्वीव कृष्णोप्याह ॥ वृद्धप्रपितामहपिंडं त्रिधा कारयेद्बुधः ॥ प्र
कर्षेणेतरे तेषां न पिता प्रेत उच्यते ॥ वृद्धस्यैव तु यत्पात्रं तत्सिं
चेत्प्रपितामहे ॥ तत्स्तते त्सिंचयेत्पात्रं तत्स्तते त्सिंचयेत्पुनरिति ॥
एवं चतुर्थस्य व्युत्क्रमेण सिंचनं दृष्टं सद्योमृतपात्रेणापि दृष्ट
स्मृत्यंतरात् ॥ वसिष्ठः ॥ नवातीतार्घ्यपात्रं च एवं च परिकी
र्त्यते ॥ पितृपात्रेषु पिंडेषु सपिंडीकरणं तु तु ॥ प्रेतपात्रोदकं
पिंडमितरेषु नियोजयेत् ॥ त्रिधा कृत्वा क्रमेणैव सापिंड्यैक
निमित्तकं इति ॥ प्रेतपात्रेनवमृततपात्रोदकं इतरेषु पितामहादि
पात्रेषु ॥ उभयदर्शनादिकल्प इति चेत् ॥ अदृष्टेषु यस्तस्यार्थ ॥
तत्रैव व्यवस्था ॥ साग्निकर्तॄणां च चतुर्थस्यैवार्घ पिंडौ त्रिधा

॥मासी॥
॥४८॥

कृत्वा सपिंडनं कुर्यात् ॥ निरग्निकः कर्ता तु घोमृतार्घपिंडौ त्रिधा
कृत्वा त्यविरोधः ॥ तत्र प्रयोगः ॥ अमुकगोत्रामुकप्रेतपात्रो
दकं ॥ अमुकगोत्राणाममुकामुकशर्मणां प्रेतपितृपितामह
प्रपितामहानामर्घ्यपात्रोदकेन सह संयोजयिष्ये ॥ संयोज
येत्यनुज्ञातः ॥ प्रेतपात्रस्थं कुशात्रयं पितृपात्रे नयेद्दत्वा प्रेत
पात्रजलं येसमानाइति द्वाभ्यां किंचित्किंचित्पितामहादित्रय
पात्रे यैते संयोजयेत् ॥ तद्यथा ॥ अमुकगोत्रामुकप्रेत अमुके
सगोत्राणाममुकशर्मणां पितामहेन सह सायुज्यं गच्छेत् ॥ ये
समानाइति द्वाभ्यामभ्यां रातः समाइत्येताभ्यां ॥ एवं प्रपिताम
ह वृद्धप्रपितामहयोः ॥ ततः पितामहादित्रिकेभ्यो मिश्रितत्वे सवि

लि
॥प्रेत॥
॥४९॥

पात्रोदकेन पार्वणवदर्घ्यं दत्वा पितृभ्यस्थानमसीति मंत्रेण पि
पितामहाद्विलंभागेनुलंकुर्यात्॥ अस्मिन्काले गंधपुष्पधूप
दीपवाससांच दानं॥ तत्र प्रयोगः॥ कालकामसंज्ञका विश्वेदे
वायेतां गंधपुष्पधूपदीपवाससा सि॥ वासोनिष्क्रयी भूत हि
रण्यानि [illegible] वः संप्रददे न मम॥ अमुकगोत्राः अस्मत्पितामहप्र
पितामहवृद्धप्रपितामहाः अमुकामुकशर्मणः वसु० एतानि गं
ध० वा: संप्र द० अमुकगोत्रामुकप्रेत० गंध० हिरण्यानि ते०
ततो घृताक्तमन्नं गृहीत्वाग्नौकरिष्य इति पृच्छेत्॥ कुरुष्वेत्यनु
ज्ञातः पार्वणवदावसथ्ये ऽग्नये कव्यवाहनाय स्वेका कुर्तिसो
मायेति द्वितीयाकुर्ती कृत्वा हुतशेषं दत्वा पात्रमालभ्य जपति पृ

॥कासी॥
॥४९॥

थ्वीवत्ते पात्रमिति वेद्यच्छव्यर्थ्यायजुषा वा॥ अंगुष्ठमन्नेवगाह्य
वैकीर्यतिलानपहता इति मंत्रेण॥ प्रेतब्राह्मणपात्रे लंभ
नाभावः॥ अग्नौकरणनिषेधादेवेदनिषेधो हुतशेषदाना
नंतरं तस्य विहितत्वात्॥ अमृते जुहोमीति मंत्रलिंगात्॥ हुत
शेषस्यैवमरस्य स्पर्शो व्याः॥ तस्मात्पात्रालंभाभाव इति सिद्धं॥
उच्छिष्टमन्नं दद्यात्॥ तत्र संकल्पः॥ कालकामसंज्ञकाः वि
श्वेदेवाः इदमन्नं यथोपस्करं दत्तं दास्यमानं च अन्नपते: अमृत
रूपेण स्वाहा संपद्यतां वो न मम॥ अमुकगोत्रास्मत्पितामह अ
मुकशर्मन्वसुरूप इदमन्नं यथोपस्करं दत्तं दास्यमानं च आन
ते: अमृतरूपेण स्वधा संपद्यतां ते न मम॥ एवं प्रपितामहवृद्ध

॥प्रेत॥
॥२०॥

त्रपितामहायोः ॥ अमुकगोत्रामुकप्रेत इदमन्नं ॥ उपतिष्ठतां ॥ ततो
देवादीनां हस्तोदकं दत्वा देवा अमृतं कुरुत पितरः अमृतं कुरु
ध्वमिति वदेत् ॥ ततः सकृत् गायत्रीजपः राक्षोघ्नीः ॥ पितृमं
त्रान् पुरुषसूक्तादिनि पठेदमुत्सु ॥ त्मसीश्शाल्वे ॥ नयत्रान्न
प्रकीर्याग्निदग्धाश्चेति मंत्रेण पार्वणवत् ॥ ब्राह्मणहस्ते स
कृत्सकृदपो दत्वा पूर्ववत् गायत्रीं जपित्वा ॥ मधुवाता इति च ॥
देवाः तृप्ताः स्थ ॥ पितरः तृप्ताः स्थ ॥ प्रेत स्वदितं ॥ सुस्वदितमि
ति प्रतिवचनं ॥ शेषमन्नं किं क्रियतां ॥ इष्टैः सह भुज्यतामिति ॥ प्र॰
ततउच्छिष्टसमीपे पार्वणवत् पिंडदानांतं विधाय प्रेतपिंडं दद्या
त् ॥ तद्यथा ॥ अपहता इति रेखाकरणं ॥ रेखायेऽत्रमुकं पेत्स

॥कारी॥
॥५०॥

पा णीति दद्यात् ॥ अमुकसगोत्रामुकप्रेत एतत्ते अवनेजनं
शु॰ सकृदाच्छिन्नास्तरणं ॥ अमुकसगोत्रामुकप्रेत एतत्ते पिंडं॰
अत्र पितरो मादयध्वमित्युक्त्वोदङ्ङासीत आतमनाद्व्यासधा
रणं ॥ अमीमदंतेति जपः श्वाससमोचनं दक्षिणतः पिंडे पारिघ
र्यवस्त्रस्य वनेजनं ॥ नमो व इति षडंजलिं करणं ॥ एतद्वः इत्युपास्य
ति प्रति पिंडानि सूत्राणि दत्वा ॥ ऊर्जं वहंतीरिति जलनिषेचकः ॥
ततः प्रेत ब्राह्मण हस्ते सु प्रोक्षितमुपातिष्ठन्तु ॥ सोमनस्यमुपति
ष्ठतु ॥ गोत्रं व्रु॰ यद्दत्तमेकोद्दिष्टश्राद्धे यमुकादितदक्षय्यमुप
तिष्ठतां ॥ विसृष्टां दक्षिणां दत्वा अभिरम्यतामिति विसर्जयेत् ॥
ततोऽमुकगो॰ प्रे॰ पिंडः पितामहादिपिंडैः सह संयोजयिष्ये ॥

न
ति

॥प्रेत॥
॥५९॥

संयोजयेत्स्वनुज्ञातः॥ कुर्वीत प्रेतपिंडं त्रिधा वि[...]ज्य ये स
मानाइति द्वाभ्यां प्रतिपिंडमेकैकं त्राकुलं योजयेत्॥ तत्र प्रयो
गः॥ अमुकसगो० अमुकप्रे० अमुकसगोत्रेणामुकशर्मणा
स्वपित्रा संसृज स्व मंत्रद्वयपाठः॥ ततः पिंडप्रथमत्राकलद
त्तिमधुलिप्तं तत्पिंडेनैकीकृत्य पात्रे स्थापयेत्॥ अमुकस
गो० अमुकप्रे० अमुकगोत्रेणामुकशर्मणा स्वपितामहेन
संसृजस्व॥ मंत्रद्वयोरावृत्त्या पूर्ववत् द्वितीयपिंडेनैकीकृत्य
प्रथमपिंडसमीपे स्थापयेत्॥ एवं प्रयोगेण तृतीयत्राकलं तृ
तीयपिंडेन संयोजयेत्॥ ततोऽर्घ्यपात्रकरणाद्यवनेजनांतं वि
धाय चतुर्थं॥ परीत्य ज्येष्ठुनामृतसहितत्रयाणां पार्वणवत्सिं

॥काशी॥
॥५९॥

दानं कुर्यात्॥ पिंडकरणे प्रयोगः॥ पितॄणां प्रेतस्यात्पुत्रं वा
श्वेन्निवर्तेत चतुर्थ इति कात्यायनोक्तेः॥ कुतः पार्वणवत्सिं
डदानं पुनरिति॥ अस्मिन्नेव सूत्रे सपिंडीकरणं च पितृ
प्रभृतित्रिभ्यो दानमिति कर्कोक्तेः॥ वाजेवाज इति विसर्ज्य॥
आमावाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्योपविशेत्॥
इति वैद्यनाथकृतो प्रेतकार्ये सपिंडीकरणं समाप्तं॥ ॥५॥
अथ त्रयोदशेऽह्नि पाथेयश्राद्धं॥ पार्वणवत्पक्वान्नेनामान्ने
नवा कुर्यात्॥ ततः कर्नाममंगलस्नानादिकृत्वा देशकालौ स्मृ
त्वा सपरिवारस्यैरे सकलारिष्टोपशांतये शुभायुर्वृध्यर्थं ग
णेशार्चनं पुण्याहवाचनं करिष्ये॥ ततः आशिषो गृहीत्वा

॥ त्रैव ॥
॥ ५२ ॥

बंधुभिः सह भुंजीत ॥ ततः ऊर्ध्वं श्रीखंडधारणं तांबूलभक्षणा ॥
दि कुर्यात् ॥ अतः प्रभृति संवत्सरपर्यंतं आमान्नमुदकुंभं च
यस्मै कस्मै चि ब्राह्मणाय दद्यात् ॥ अदैवं पार्वणं श्राद्धं कुर्यात् ॥
तदुक्तं याज्ञवल्क्येन ॥ अर्वाक् सपिंडीकरणं यस्य संवत्सरा
द्भवेत् ॥ तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे ॥ गौतमः ॥
अदैवं पार्वणं श्राद्धं सोदकुंभमधर्मकं ॥ कुर्यात्प्रत्याब्दिका
च्छ्राद्धात्संकल्पविधिना च हमिति ॥ अधर्मकं ब्रह्मचर्यादि
नियमहीनं ॥ अत्र कौमासि मासि चैतत्कर्तव्यं ॥ अत्र पिंड
दानं कृताकृतं ॥ अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्या
त्पिंडमेके निपृणंतीति हेमाद्रौ ॥ प्रथमाब्दे दीपदानमुक्तं देव

वा
॥ काश्यपां ॥
॥ ५२ ॥

ज्ञानीये मार्कंडे ॥ देवालये द्विजालये वा दद्यात् ॥ प्रथमेऽब्दे किं क
र्तव्यमिति अत आह ॥ तीर्थश्राद्धं गयाश्राद्धमित्यादीनि वाक्यानि
वृकुनीतिष्ठति तानि सपिंडनाभावे ॥ अस्थिक्षेपं गयाश्राद्धं श्रा
द्धं चान्यत्र पैतृकं ॥ प्रथमेऽब्दे न कुर्वीत तत्कृते तु सपिंडने ॥ अस्या
पवादमाह ॥ अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षकं ॥ प्रथ
मेऽब्दे प्रकुर्वीत यदि स्याद्वृद्धिमान्सुतः इति ॥ ग्रंथगौरवभयान्नो
ह लिख्यते ॥ इति वैद्यनाथकृतौ प्रेतमंजर्यां त्रयोदशादिनकृत्यं स
माप्तं ॥ अथ विधानानि लिख्यंते ॥ धनिष्ठादिपंचनक्षत्रे प्रेतश्रा
द्धं किं कर्तव्यमित्यत आह ॥ शातातपः ॥ धनिष्ठापंचके जीवमृतो यदि
कथंचन ॥ पुष्करे याम्यभे जीवो कुलजं मारयेद्ध्रुवं ॥ तन्नारि

॥प्रेत॥
॥५३॥

ष्टविनाशार्थं विधानं समुदीर्यते ॥ दाहदेशे शवं नीत्वा स्नापये
त्पूतः शुचिः ॥ दर्भैस्तु प्रतिमाः कार्याः पंचोर्णाः सूत्रवेष्टिताः ॥ य
वपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ॥ प्रेत [illegible] वाह प्रेतस
खः प्रेतपः प्रेतभूमिपः ॥ प्रेतहर्ता पंचमस्तु नामान्येतान्यनु
क्रमात् ॥ तत्रैव प्रयोगः ॥ आचम्य प्राणानायम्य देशकालौ सं
कीर्त्यामुकसगो० प्रे० धनिष्ठापंचकमरणजनितवंशानिष्टप
रिहारार्थं पंचकमरणविधिं करिष्ये ॥ ततः प्रतिमा गंधाद्यैरं
भ्यर्च्य दाहसमये प्रेतस्योपरि न्यसेत् ॥ प्रथमां शिरसि ॥ द्विती
यां नेत्रयोः ॥ तृतीयां वामकुक्षौ ॥ चतुर्थीं नाभौ ॥ पंचमीं पा
दयोः ॥ तदुपरि नाममंत्रैर्घृतेनाहुतीर्हुत्वोदकधारां दत्वा यमाय

॥काशी॥
॥५३॥

वा ॥ त्र्यंबकं यजामहे इति ताभ्यां प्रतिमास्तु प्रत्येकमाज्याहुति
स्तु कुर्यात् ॥ ततो विधिना प्रेतं दहेत् ॥ सूतकांते पुनः पुत्रः कुर्या
च्छांतिकपौष्टिकं ॥ कांस्यपात्रं स्थितं तैलं वीक्ष्य दद्याद्विजन्मने ॥
ब्रह्माविष्णुमहेशेंद्रवरुणप्रीतये ततः ॥ माषमुद्गयवव्रीहीन्प्रियं
गवादि प्रयच्छति ॥ स्वर्णदानं रौप्यादं एवं लक्षहोमो द्विजार्चनं ॥
गोभूदानं षडंगे कुर्याद्दोषोपशांतये ॥ इति पंचकमरणं ॥ अ
थ त्रिपादमरणं ॥ त्रिपादर्क्षे मृते तद्वद्धिरण्यशकलं मुखे ॥
यस्यापि पिष्टमयं कुर्याद्दसाग्नेर्विधिर्विस्मृतः ॥ कुर्यात्स्त्रीजित
पं पिष्टमयं साग्नेर्मृतेस्त्रिपां ॥ हरिद्रावस्त्रसंछन्नानि हरेत्पुः
त्रनादयः ॥ इतरे निखनेद्देवं जले वा प्रतिपादयेत् ॥ त्रिपादिना

॥प्रेत॥
॥५४॥

भौमेऽप्युरविर्योगस्त्रिपुष्करः॥ द्वयोर्योगो द्विपुष्करः॥ तत्र कर्त्ता
कर्मण्यधिकारार्थं दहनत्रयं कुर्यात्॥ तत्र प्रतिमात्रयं सर्वं वहेत्
त्रागंधाद्यैरलंकृत्य पूहसमयेऽप्रेतोपरिन्यसेत्॥ प्रेतवाहः प्रेत
सखः२ प्रेतप वः३ इत्यनुक्रमात्॥ प्रथमाङ्गिरसि॥ द्वितीयां ह
दि॥ तृतीयां नाभौ॥ शेषं सर्वं वत्॥ सूतकांते भद्रातिथिमृत
स्य भ्रस्त्रस्यान्नायं हिरण्यं दद्यात्॥ त्रिपादनक्षत्रमृतस्य हिर
ण्यं दद्यात्॥ रथ्यं गारकगुरुवाराणामेकस्मिन्वारे मृतवस्त्रदानं
कुर्यात्॥ इति त्रिपादमरणं विधिः॥ अथ प्रथमदिनातिक्रां
तप्रेतसंस्कारकालमाह हेमाद्रौ गार्ग्यः॥ [illegible] प्रत्यक्ष
शवसंस्कारे दिनं नैव विशोधयेत्॥ आशौचमध्ये संस्कारे

॥काशी॥
॥५४॥

दिनं शोध्यं नु संभवे॥ आशौचविनिर्मुक्तौ चेत्पुनः संस्क्रियते मृ
तः॥ संशोध्य च दिनं ग्राह्यमूर्ध्वं संवत्सराद्यदि॥ शेषकार्याणि
कुर्वीत श्रेष्ठं तत्रोत्तरायणं॥ कृष्णपक्षस्य तत्रापि वर्जयेच्च दिनत्र
यं॥ वाराह॥ चतुर्थीं मगे चैव द्वादशीं च विवर्जयेत्॥ प्रेतकृत्ये व्य
तीपाते वैधृतौ परिघे तथा॥ करणे विष्टिसंज्ञे च शनैश्चरदिने
तथा॥ त्रयोदश्यां विशेषेण जन्मर्क्षे तत्रये तथा॥ भरण्यार्द्रा
मघाश्लेषामूलं द्विचरणानि च॥ प्रेतकृत्ये त्रिपुष्कराणि धनिष्ठाद्यं
त पंचकं॥ वस्तुतस्त्वार्द्रतः पंचनक्षत्रेषु त्रिजन्मनाः॥ पौष्णब्राह्म
र्क्षयोश्चैव दहनान्कुलनाशनं॥ अस्यापवादमाह॥ वेदवाप
ग्नः॥ प्रेतस्य साक्षाद्दग्धस्य प्रातिखेकादशोहनि॥ नक्षत्रति

८५

पिवारादिरोगधनियंनकेचन॥विश्वप्रकाशे॥गुरुभार्गवयो
र्मौढ्येपौषमासिमलिम्लुचे॥नीततिःपितृमेधस्यम्यांगो
दावरींविना॥प्रेतक्रीयानकर्त्तव्यारविवारेकथंचन॥युग्मेतु
थ्यानुराधायांरेवत्यांयमपैतृके॥दाल्भ्यउ०पंचकेमृतका लो
नांशुभाशुभफलोच्यते॥वासवोत्तरदलादारभ्ययावन्नक्षत्रपं
चकं॥घनिष्ठाबुधसंयोगेवारुणंभृगुनंदने॥पूर्वानंदेहिगुरुयो
वारवौभौमेचरेवती॥वारसंयोगनक्षत्रेशुभाविष्यतिमह
द्भयं॥पुरुषायास्त्रियोवापिबालागावोमहिषं॥माहिषीवृष
भोवापिदासीदासास्तथैवच॥विपत्तिपंचकंयांतिअरिष्टंतुम
हद्भयं॥संतोग्रहणेसूर्येरिक्तागंडांतपातयोः॥वैधृतेवज्रवि

॥प्रेत॥
॥५५॥

॥काशी॥
॥५५॥

२

ष्कंभेशूलेव्याघातपरिघे॥गंडेभद्रासुरात्रौकुनींनीतंचैवचतुष्प
दे॥एतासंयोगीनांयदामृत्युर्भविष्यति॥नतस्योर्ध्वगतिःप्रोक्तासं
ततौनशुभंभवेत्॥नतस्यदाहःकर्त्तव्योविनाशःसर्वजातिषु॥पंच
कानंतरंतस्यकर्त्तव्यंसर्वमन्यथा॥पुत्राणांतस्यसंतापोगतिस्तस्य
नजायते॥अथवातद्दिनेकार्योदाहकस्तुविधिपूर्वकं॥सूतकां
तेतदापुत्रैःशांतिःकार्याप्रयत्नतः॥वासवोत्तरदलेमृत्योअन्येजा
ताःसहस्रकं॥गायत्रीमयुतंलक्षांप्राणायामशतत्रयं॥दशांशे
विधिनाकुर्यात्तिलाज्येनद्विजोत्तमः॥पंचरत्नतिलैःकृष्णैःपंच
धान्यफलंतथा॥तंदुलैःपरिपूर्णंचघटंवस्त्रसमन्वितं॥सुव
र्णधेनुसंयुक्तंब्राह्मणायनिवेदयेत्॥[illegible]मृतंस्यात्पंचब्राह्म

तदा

॥श्रौत॥
॥५६॥

णा भोजयेच्छतं वा सर्वेमत्युदोषाणां शांतिर्भवति निश्चितं ॥ इति प
निष्ठा शांतिः ॥ अथ शततभिषा ॥ शततभिषाविधानं तु जपं त्रणव पू
र्वकं ॥ वरुणस्योत्तंभनमसीजप्याः सहस्रकं ॥ कलशं च जलं पूर्णं स
प्तधान्यसमन्वितं ॥ सुवर्णवस्त्रसंयुक्तं ब्राह्मणाय निवेदयेत् ॥
होमं जपदशांशेन तिलाज्येन तु कारयेत् ॥ ब्राह्मणान्भोजयित्वा
तु शतार्धं चैव संख्यया ॥ सुवर्णं श्वेतवस्त्रं च श्वेतां गां दक्षिणां ददेत् ॥
चतुर्थफलदानं च श्रोत्रियाय निवेदयेत् ॥ इति शततशांतिविधानं ॥
अथ पूर्वाभाद्रपादा ॥ अजैकपादि धानं च प्राणायामशतत्रयं ॥ म
हिषी सुवर्णवस्त्रं च ब्राह्मणाय निवेदयेत् ॥ महाशांतिः प्रकर्तव्याय
हशांतिर्विधानतः ॥ अरिष्टशमनं चैव शांतिर्भवति निश्चितं ॥ इति पूर्वा

॥काशी॥
॥५६॥

भाद्रपदाविधानं ॥ अथोत्तराफाद्रपदा ॥ उत्तरे भाद्रपदामध्ये सौप्रा
णायामशतत्रयं ॥ गायत्रीमयुतं जप्याद्दशांशे होममाचरेत् ॥ गो
धूमैः पूर्णकलशं वस्त्रं च ससुवर्णकं ॥ पंचरत्नसमायुक्तं फल
चाप्यसमन्वितं ॥ शांतिकं ग्रहयज्ञं च रक्तां गां दक्षिणां ददेत् ॥ अ
रिष्टशमनं चैव शांतिर्भवति शाश्वती ॥ इत्युत्तराभाद्रपदाविधा
नं ॥ अथ रेवती ॥ पौष्णे तु मध्ये संजाते प्राणायामशतत्रयं ॥ गा
यत्रीमयुतं जप्याद्दशांशे होममाचरेत् ॥ घृतं तैलं गुडं चैव कार्पासं ल
वणं तथा ॥ रसैरेतैः पूर्णकलशं पंचरत्नसमन्वितं ॥ पंचफलानि
वस्त्रं च सुवर्णं दक्षिणां ददेत् ॥ ब्राह्मणान्भोजयेच्छन्म्याश्वेतां गां
दक्षिणां तथा ॥ इति पंचकविधानं ॥ अथ प्रोषितस्य सापिंडहोलिरव्यते ॥

॥ प्रेत ॥
॥ ५७ ॥

तत्र देवत्रानीयैस्त्रिः ॥ प्रोषित श्चेन्मृतस्तस्य विशेषः प्रतिपाद्य
ते ॥ परार्ध्यं हृदयमष्टौ वा ह्न ध्रान्हमत्वोऽस्तुतादिभिः ॥ मृताग्निहोत्र
होतव्यं प्राकृदाहात्तत्र कथ्यते ॥ प्राचीनावीतिना सर्वं स्यैशौमवो
क्रे स्रवरे ॥ सादनां भ्रावतः कूर्चस्थापनमभ्यञ्चे दिह ॥ प्रागग्रे
दक्षिणाग्रेश्चेत्तणेनां स्यौरिस्त्रृभिः ॥ पर्युक्षणं चैतस्यैवं कार्यमं
त्राप्रदक्षिणा ॥ नर्या दक्षिणतो भस्म निरुह्योणान्च संधिनो ॥
दुग्धा भस्मन्यधिश्रित्यावन्यो नयेनतः ॥ धारयेत्समिधेन्या
योनयं दक्षिणतो नयेत् ॥ तच्छी सामिधमाधाय सव्यंजानु नि
पात्य च ॥ अपसव्यं स्रुवं हृत्वा सत्र स्तसर्वं विनिक्षिपेत् ॥ इति दा
हात् ॥ पूर्वयावदायोस्यस्थी निनावदेवमग्निहोत्रहोमः कर्तव्यः ॥

१
॥ का॰श्री ॥
॥ ५७ ॥

प्रोषिते यजमाने प्रेते कथं दाहः पुनः कर्तव्यमित्यपेक्षायामाप
स्तंबः आह ॥ अनग्निरुत्सृष्टाग्निर्विच्छिन्नाग्निर्वा प्रमीयेतेतम
न्येन न दहेत् ॥ यजमानायतने प्रेतं निधाय गार्हपत्यायतने अ
रणी संस्थाप्य यस्याग्नयो नु तौहमांसकामाः संकल्पयन्तु
ते यजमानमासं ॥ आयंतु तेह विषे सादयते स्वर्गलोकमिमं
डातें नय [illegible] तिमथित्वा तच्छी विहृत्य यद्दराग्रहीतेन [illegible] चं
प्ररपित्वा तच्छी कृत्वा ततो मात्यादि कर्म प्रतिपद्यते ॥ अथाग्नौ
समारूढे यजमाने मृते अरण्योः प्रेतस्य त्वं हत्वोपावरोहेण
मंत्रेण पठि त्वाग्निमथित्वा तच्छीमाहवनीयमुद्धृत्यान्यत्संस्कृते ग
दराग्रहीतं तच्छीमाहवनीये कृत्वोरवाधि यणादि कुर्यात् ॥

॥प्रेत॥
॥५८॥

मंत्रस्तु॥ उपावरोहजातवेद इमं प्रेतं स्वर्गायलोकायनयप्रे
ताहुतिं चास्य जुषस्व स्वाहेति॥ अग्निषु शांते॥ शावं विभ्रथा
रण्योर्यजमाने प्रेते अपूर्वे अरणी आदाय तयोरुपरि दक्षि
णपाणिं निधाय पुत्रादिरयं त इति जपित्वा पश्चान्मंतांध्यान
वत्सिं विंधित्वा तं पूर्ववद्दहेत्॥ एवमेव तस्मिन्नरणीग्नेरपि दृष्टव्यं॥ उ
त्पन्नाग्नेरुत्सृष्टाग्नेश्च विशेषः॥ मरणसमये ग्निस्सिध्यर्थं पा
राकृदपमष्टौ कृच्छ्रान् वाहत्वाग्निविछेद गणनया यथा संख्य
प्रायश्चित्तं विधाय शान्तश्चेत्तु तादिभिः पश्चात्संस्कारः
कार्यः॥ अग्निविच्छेद प्रायश्चित्तमाह कात्यायनः॥ यावंत्यब्दा
न्यतीतानि निरग्नेर्विप्रजन्मनः॥ तावंति कृच्छ्राणि चरे

॥काशी॥
॥५९॥

द्धोम्यं दद्यात्प्रयत्नत इति॥ एवं प्रायश्चित्तं विधायाग्निर्मंथनं विदध्या
त्॥ यजमाने प्रेते पुत्रादिना प्रायश्चित्तमेवं कृत्वान्वाधानवत्सर्वं का
र्यं॥ देशांतरे मृते उक्तविधिना दाहः स्वाशरीरमग्नीसमीपमाहृत्य
कृष्णाजिने पुरुषाकारं विन्यसेत्॥ तदुक्तं विधानपारिजाते॥ ततः कृ
ष्णाजिने स्थीनि पुरुषाकारं विन्यसेत्॥ ऊर्णाभिश्छादयेत्ताभिर्घृतेना
भ्युज्य पूर्ववत्॥ पात्राणि योजयित्वा तु दहेत्सितापसाग्निभिः॥ अना
हिताग्निमध्ये वा निरग्निं च दहेदपि॥ प्रथमं तद्दहः कृत्वा यथाशास्त्र
हि संचयः॥ अस्थीनी चेन्न लभ्यंते प्रोक्तस्थानि होत्रिणः॥ तदुक्तं॥
आश्वलायनकारिकायां॥ अस्थिनाशे पुर्णवृक्षैः पुरुषं प्रतिकल्प
येत्॥ अशीत्यर्द्धं शिरःस्थाने ग्रीवायां दश योजयेत्॥ उरसि त्रिंशतिं

॥प्रेत॥
॥८२॥

र्द्याद्विंशतिं जठरे न्यसेत्॥ बाहुद्वये शतं दद्यादंगुलीषु तथा दश॥
दादशं तु वृषणयोरष्टौ र्धनु शिश्ने एवं तु॥ ऊरुद्वे शते तं जानोर्दद्यात्त्रिंश
तिं सानुजंघयोः॥ पादांगुलीषु दश चैव वंषष्टि शतत्रयं॥ कुणी
सूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत्॥ द्व्यंतर प्रक्षेप स्तु त्रोनि
मने॥ मस्तके कदलीं दद्यात् नारिकेलं शिरःस्थले॥ ललाटे कद
लीं चैव दन्तेषु दाडिमान्यसेत्॥ कर्णयोः कंकणं दद्यात् नेत्रयोः श्री
कपर्दकौ॥ तिलपुष्पं नासिकायां नाभौ वाताम्रफलं न्यसेत्॥
वाते मनःशिलां दद्यात् लिंगे तु हरितालिकं॥ वृक्के समुद्रफेनं तु
रुधिरे मधु विन्यसेत्॥ पुरीषे गोमयं दद्यात् केशेषु कटिकेसरान्॥
रोमसु ऊर्णाः प्रदातव्या मांसेषु यवपिष्टकं॥ पंचामृतैः पंचगव्यैः

॥कावी॥
॥८९॥

प्रोक्ष्य जीवं तु भावयेत्॥ पुष्प चंदन सुगंधैः रूपवीतेन चार्चये
त्॥ ततः संस्कारकरणं स्वशाखाविधिना यथा॥ इति पालाश
विधिः॥ अथ साग्निकादि दुर्मरणमृतस्य संस्कारप्रकार
माह पाराशरः॥ चांडालेन श्वपाकेन गोभिर्विप्रहतो यदि॥ आ
हिताग्निर्मृतो विप्रो विशेषेणात्मघातकः॥ दहेत्तं ब्राह्मणं विप्रो
लौकिकाग्नौ मंत्रवर्जितं॥ तदस्थीनि पुनर्गव्यं क्षीरेण क्षालये
त्॥ स्वेनाग्निना स्वमंत्रेण पृथगो पृथगे पृथगेतत्पुनर्दहेत्॥
इति॥ तदपि संवत्सरोत रांते षण्मासांते वा चांद्रायणत्रयं ना
रायणबलिं च कृत्वा कार्यं॥ तदाहांगिरः॥ चांडालादुदकात्सर्प
ब्राह्मणाद्वैद्युतानलात्॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां॥

॥प्रे॰॥
॥८०॥

न

उदकं पिंडदानं च ये तेभ्यो पस्त्रदीयते ॥ नोपतिष्ठति तत्सर्वमंत
रिक्षे विनश्यति ॥ न संस्कारविधिस्तेषां नैव कार्योदकक्रिया ॥
रुदनं नैव कर्तव्यं सूतकं च न बंधुभिः ॥ दग्ध्वा शरीरं लोकाग्नौ
संस्थाप्यास्थीनि यत्नतः ॥ प्रायश्चित्तं तु कर्तव्यं पुत्रैश्चांद्राय
णं त्रयमिति ॥ अथवा द्विगुणं प्रायश्चित्तं कृत्वा स एव संस्कु
र्यादिति नारायणः ॥ द्वितीये ॥ यत्तु नाशौचं नोदकं नाश्रु न दाह
यंतकर्म च ॥ ब्रह्मदंडहतानां च न कुर्यात्कटधारणं ॥ कटं प्रेत
वहनं साधकं ॥ नैतान्नं प्रक्षिपेदस्थि आवसथ्यं चतुष्पथे ॥ पा
णिनं तु दहेदग्नौ यजमानेव्यथा मृते ॥ इति तदकृत प्रायश्चित्त
बुद्धिपूर्वकाल घातादिहताभावविषयं वेतितव्यं ॥ अथ प्रमा

॥काशी॥
॥८०॥

८२

देन मृतानां संस्कारमहांगिरः ॥ अथ कश्चित्प्रमादेन म्रियता
ग्न्युदकादिभिः ॥ तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया ॥
प्रमादे निष्कृतिः कार्या चांद्रेवा तप्तकृच्छ्रकैः ॥ कृच्छ्राणां पंचदशैव
ततः संस्कारमाचरेत् ॥ इति ॥ यदि शास्त्रविहीतमार्गेण बुद्धि
पूर्वकामे घातं प्रयागादौ कृतवतां दोष एव नास्ति ॥ त्रिरात्रमेवा
शौचं ॥ तत्रैव दशाहकृत्यं कार्यं ॥ चतुर्थदिने एकादशाहकृत्यं ॥
पंचदिने सपिंडनं ॥ अथ दुर्मरणे दानानि कार्याणि ॥ तत्र शा
तातपीये ॥ व्याघ्रेण च हते विप्रे विप्र कन्यां विवाहयेत् ॥ सर्पदष्टे
नागबलिर्ज्ञेयः सर्पश्च कांचनः ॥ चतुर्भिः छमितं हेम गजं दद्या
जलेहतौ मिति ॥ राज्ञा विनिहते दद्यात्पुरुषं तु हिरण्मयं ॥ चोरेण

निहते धेनुवैरिणा॥ निहते वृष॥ वृषेण निहते दद्याद्धान्यधान्यम्
चकांचनं॥ शय्यामृते प्रदातव्या शय्यालंकृतिसमन्विता॥ निष्कमा
त्रसुवर्णस्य विष्णुना समधिष्ठिता॥ शौचहीने मृते चैव वह्निनि
ष्कं स्वर्णजं हरिं॥ संस्कारहीने च मृते कुमारमुपनाययेत्॥ निष्क
त्रयं स्वर्णमितं दद्याद्धेमवर्हं तं तथा॥ शुना हते क्षेत्रपालं स्वर्णपृथ्वि
न्निजराञ्चितः॥ सूकरेण हते दद्यान्महिषीं दक्षिणान्वितं॥ कृ
मिभिश्च मृते दद्याद्गोधूमान्पंचखारिका॥ वृक्षं वृक्षहते दद्या
त्सौवर्णं वस्त्रसंयुतं॥ शृंगिणा निहते दद्यादृषभं वस्त्रसंयुतं॥
शकटेन हते दद्याद्व्यंसोपस्करान्वितं॥ भृगुपाते मृते चैव प्रदद्या
द्धान्यपर्वतं॥ अग्निना निहते कार्यं उदपानं स्वशक्तितः॥ दारु

णा निहते चैव कर्त्तव्या सदने सभा॥ शस्त्रेण निहते दद्यान्महिषीं दक्षि
णान्वितां॥ अश्मना निहते दद्यात्सवत्सां गां पयस्विनीं॥ विषेण च
मृते दद्यान्मेदिनीं स्वर्णनिर्मितां॥ उद्बंधनमृते दद्यात् कपिं कनकनि
र्मितं॥ मृते जलेन वरुणं हैमं दद्याद्द्विनिष्कजं॥ विषूचिकामृते स्वा
दु भोजयेच्छरातं द्विजान्॥ घृतधेनुः प्रदातव्या कंठांतकवहे मृ
ते॥ कासरोगेण च मृते अष्टलक्षं व्रतं चरेत्॥ अतिसारे मृते लक्षं
गायत्र्याः प्रयतो जपेत्॥ शाकिन्यादिग्रहग्रस्ते जपेद्रुद्रं यथोदि
तं॥ विद्युत्पातेन निहते विद्यादानं समाचरेत्॥ अन्तरिक्षं मृते कार्यं
वेदपारायणं तथा॥ मशास्त्रपुस्तकं दद्यादस्पृश्यस्पर्शितो मृते॥
पतिते च मृते कुर्यात्प्राजापत्यांस्तु षोडश॥ मृते वापत्यरहिते

॥प्रेत॥
॥६२॥

णां न्नवर्तिं चरेत्॥ एवं कृते विधानेन तु विदध्यादौर्ध्वं देहिकमिति॥
इति दुर्मृतविधिः॥ अथ कुष्ठीमरणे॥ यमः॥ स्नेनस्य कुष्ठिनो देहं नि
खने ङ्गोष्ठ भूमिषु॥ वासररत्रितयं पश्चादुध्धृत्या न्यत्रैतं दहेत्॥ न
गं गाप्लवनं कार्यं निक्षिपेद्विधिरुच्यते॥ षडब्दं प्रचरेत्तु विनाश्यं
कं तु चरेत्॥ ततोस्थि संचयं तस्य गंगायां प्रक्षिपेत्सुधीः॥ मासि मा
सि ततः कुर्यान्मासिश्राद्धानि पार्वणान्॥ संकल्पविधिना केचित्प्रव
दंति मनीषिणः॥ इत्येतत्कुष्ठिनो ह्यूर्ध्वं कथितं शास्त्रकोविदैः॥
स्मृतिविद्भिरन्त्याचारैर्नैर्यमाद्यैर्पतविग्रहैः॥ इति कुष्ठिमरणं॥ प
र्वौच्छ्रा नामे वं घृत्वा विधिना दहेत्॥ अथ सहगमन विधिः॥ अन्वा
रोहणं स्त्रीयाणां तु मासनो भर्तुरेव च॥ सर्वपापक्षयकरं निरयो

॥काशी॥
॥६२॥

त्तारणाय च॥ अनेकस्वर्गफलदं मुक्तिदं च तथैव च॥ जन्मान्तरे च
सौभाग्यं धनपुत्राप्तिवृद्धिदं॥ अद्येहेत्यादि॰ आत्मनो भर्तुश्चै
तज्जन्मजन्मांतरपरं परार्जितसर्वपापक्षयद्वारा लक्ष्मीनारायण
प्रीतये अन्वारोहणं करिष्ये॥ तदंगाहरिद्राकुंकुमांजनादि सौभा
ग्यद्रव्ययुक्तवंशपात्रदानमहं करिष्ये॥ तत्र वंशपात्रदानमंत्रः॥
लक्ष्मीनारायणो देवो बलसत्वगुणाश्रयः॥ मादं सत्वं च मे दंपा
दायपौः परितोषितः॥ सोपस्काणि नरोत्तमपाणि नारायणेः संयुतानि
च॥ लक्ष्मीनारायणप्रीत्यै सत्वकामाद्ददाम्यहं॥ अनेन यथोपस्का
र स्वर्पदानेन लक्ष्मीनारायणः प्रीयेतां॥ अग्नेः समीपमागत्य पंच
रत्नानि पल्लवे॥ निलांजनं तथा बध्वा मुखे मुक्ताफलं न्यसेत्॥ ततो

अग्निं प्रार्थनां कृत्वा मंत्रेणानेन निश्चितं ॥ स्वाहासंश्लेष निर्विण्ण
सर्वगोत्र कृताशान ॥ सत्यमार्गप्रदानेन नय मां पत्युरंतिकं ॥ इत्य
ग्निं प्रार्थ्यान्येन कुर्यात् ॥ अग्नये तेजोधिपतये स्वाहा ॥ इदम
ग्नये तेजोधिपतये न मम ॥ यथादैवतं त्यागः ॥ विष्णवे सत्याधि० ॥
कालाय धर्माधिपतये स्वाहा ॥ इदं पृथिव्यै लोकाधिष्ठात्र्यै० अद्भ्यो
रसाधिष्ठात्रीभ्यः० वायवे बलाधिपतये० आकाशाय सर्वाधि० ॥
एकादशाहुतीर्हुत्वा कुर्यादग्नेः प्रदक्षिणं ॥ ततः शिलां समुद्धृत्य तामा
स्य फलपुष्पांजलिं गृहीत्वाग्निं प्रार्थयेत् ॥ त्वमग्ने सर्वभूतानां म
तश्चरसि साक्षिवत् ॥ त्वमेव देव जानीषे न विदुर्यानि मानुषाः ॥ अ
नुगच्छामि भर्तारं वैधव्यभयपीडिता ॥ सत्यमार्गप्रदानेन नय मां

॥प्रेत॥
॥६३॥

॥काशी॥
॥६३॥

भर्तुरंतिकं ॥ मंत्रमुच्चार्य शनकैः प्रविशेच्च हुताशनं ॥ तां प्रेतस्योत्त
रतः सुप्तां देवरशिष्यो वा नमस्य करे धृत्वा उदीर्ष्वेति द्वाभ्यां मंत्रा
भ्यां सत्यरहितां उत्थापयेत् ॥ सत्याधिकानुहृदः समाश्वास्य भर्ता
रं विष्णुरूपं स्मरंती प्रविशेत् ॥ इदं गर्भिणीबालापत्यासूतिकानां नि
षिद्धं ॥ स्वैरिणीनां गर्भहणीनां पतितानां न योषितां ॥ नास्त्यग्नि
संवेशः पतितोपि तथा उभावित मदनरत्ने स्मृतिसंग्रहोक्तेः ॥ बृह
न्नारदीयेपि ॥ बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ॥ रजस्व
ला राजन्स्ते मारोहंति चितां ताः इति ॥ ब्राह्मण्या एकचितिः ॥ क्षत्रिया
दीनां पृथक्चिता वा ॥ पदान्तुरस्थला नारी मृते पत्यौ देशकालवशात्तदे
वानुगच्छन्निन शुद्धिं समीक्षते ॥ तत्र विधिः ॥ यदा स्त्रीणामुदक्यानां

॥प्रेत॥
॥६८॥

पतिः प्राणांस्त्यजे तुल्यं जेन्न॥ द्रोणमेकं तंदुलानां नव हन्याद्दिशुद्धये॥
मुसलाघाते स्वदस्यश्वत्रस्त्र वेध्यो निमंडलात्॥ विरजं स्त्री मन्यमानं
स्वोचिते तद्दस्य क्षयं॥ द्वात्रिंशोच्चं प्रकुर्वीत पंचमन्त्रि कृपा पृथक्॥
त्रिंशाद्विंशति द्वाशा गवांदत्वा तु ह त्रमात्॥ विप्राणां वचनाच्छुद्धिं
समारोहेद्धुताशनं॥ नारीणां सरजस्का भामि यं शुद्धिस्त्वा ह
ना॥ अत्र मूलं चिंत्यमिति निर्णयसिंधौ॥ अन्वारोहे तु नारीणां
पत्युश्चैकोदकक्रिया॥ पिंडदानं क्रीया तद्वच्छ्राद्धं प्रत्याब्दिकं तथा
अन्वारोहे तु ते पत्या पृथक् पिंड तिलांजलीन्॥ पृथक् शीलेन कु
र्वीत दद्यादेकत्रिलितथा॥ एकचित्यारोहणे स्त्रियाः पृथक्॥ पिं
डनं नास्ति भर्तुः स्तते स्त्रीयाः कृते भवतीति स्मृत्यर्थसारे॥ अत्रैवे

॥काशी॥
॥६४॥

केनेति वृद्धयमः॥ अर्नौ दिवत्रय पेणेत्यन्ये॥ इति सहगमनं॥ अथ प्र
संगाद्रजस्वलामरणविधिरुच्यते॥ गृह्यकारिकायां॥ अन्तरिक्षे
मृता ये च बन्धावप्युगमादतः॥ उदक्या सूतिका नारी चरेच्चांद्रायणं
त्रयं॥ स्मृतिसंग्रहेपि॥ पंचगव्यैः स्नापयित्वानु गव्यैः प्रेतीरजस्व
लां॥ वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकमिति॥ तत्र प्रयोगः॥
अद्येहेत्यादि० अमुकसगोत्रायाः अमुकस्या रजस्वलावस्थाम
रणजनितदोषपरिहारार्थं और्ध्वदेहिकयोग्यतासिद्ध्यर्थं चांद्रा
यणत्रयपूर्वकं स्वरूपेणाष्टोत्तरशतस्नानानि करिष्ये॥ ब्राह्मणव
चनेन चांद्रायणत्रयं प्रत्यायवाष्टि नप्रेतमनुलिप्येन स्वयं स्नात्वा
स्वर्पी दकेन अष्टोत्तरशतवारं स्नापयेत्॥ अन्यवस्त्रेणाच्छाद्य दहे

२ स्त्रियाः

॥ प्रेत ॥
॥ ६८ ॥

दिति सर्व्वः ॥ अथ प्रसंगात् सूतिकामरणं ॥ तदुक्तं मिताक्षरायां ॥ सू
तिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः ॥ कुंभे सलिलमादाय पंचग
व्यं क्षिपेत्ततः ॥ पुण्यं गाभिरभिमंत्रैः स्तु संस्नाप्य विधिनादहेत् ॥
गृह्यकारिकायां ॥ सूतिकामरणे चात्र सर्वौषध्यनुलेपनं ॥ अस्त
तकीनु संस्था त्रयस्तर्पाणां तु रात्रं क्षिपेत् ॥ दशादिनादुत्तरं तु ॥ सूति
कानु यदा नारी प्राणांश्चैव परित्यजेत् ॥ मासमेकार्धं यावत्त्रि
भिः सच्छैर्विशुध्यति ॥ तत्र प्रयोगः ॥ अद्येहेत्यादि० अमुकसगो
त्रायाः अमुकस्याः सूतिकावस्थामरणजनितदोषपरिहारार्थं
और्ध्वदेहिकयोग्यतासिध्यर्थं सर्वौषधीलेपनपूर्वकं चांद्रा
यणत्रयं पुण्याभिरभिषेकं च करिष्ये ॥ कुंभस्थापनपूर्वकम

॥ काशी ॥
॥ ६८ ॥

भिर्लिंगैरन्यैर्वारुणैर्मंत्रैः स्नापयित्वा विधिना दाहं कुर्यात् ॥ इति
सूतिकामरणं ॥ अथ गर्भिणीविधिः ॥ षडशीतिमते ॥ गर्भिण्यां
चैव मृतायां दक्षिणात्शिरस्त्वं तथा ॥ येतस्या नाभिरंध्राच्छेयमु
दरं चतुरंगुलं ॥ हिरण्यगर्भः समवर्त्ततेति छित्वा गर्भमथ्ये दत्राव्य
स्तं प्रक्षाल्य निखनेत्स यदि जीवेत् ॥ जीव मम पुत्रकेत्युक्त्वा क्षे
त्रियेत्वेति पंचभिः स्नापयित्वा हिरण्यमंत्रधीः पव्याहृतिभि
र्मंत्र्यौ पस्ते स्तन इति स्तनं पाययित्वा शिशुं ग्रामं त्रापयेत् गर्भछे
दनं स्थले शंतापुध्यायेति पंचाकुत्ता कृत्वाभिमंतु दरं स्तत्रेण पामं
पृथ्युपघ्नेतेनानुलिप्य ब्राह्मणाय तिलगांधा त्रिसुवर्णं दद्याद्य
थोक्तेन कल्पेन दहेत् ॥ बोधायनेन तु शंतापुध्यायेति पंचहो

॥प्रेत॥
॥६६॥

मानंतरं॥ आयासायप्रायासाचेत्यादिष्वावाप्येविवीक्ष्याधं
स्वाहांतैरप्यधिकाउच्चा:॥ गर्भच्छेदकारिकायां॥ यदा गर्भवती
नारी सशल्या संस्थिता भवेत्॥ कुक्षीं भित्वा ततः शल्यं निर्हृ
रेद्यदि जीवति॥ प्रमीते निःस्वमेतुन्ते प्रायश्चित्तमतः परं॥ सा
त्रयस्त्रिंशता नारी कृच्छ्रैः शुध्यते शल्यदोषतः॥ सगर्भं दहनेना
सौ तस्या वै वधपातकं॥ प्रायश्चित्तं चरित्वा तु शुध्यंति पापका
रिणः॥ दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत्॥ इति गर्भि
णीमरणविधिः॥ अथ दुर्मरणमृतानां प्रायश्चित्तानि॥ कृष्णो
च्छिष्टाधरोच्छिष्टोऽभ्ययो च्छिष्टशुसस्वपि॥ अस्पृश्यस्पर्शमि
रणेरवङ्गायांनिगडादिषु॥ त्रीन् षड्द्वादश वा पंचदश षोडश वा क्ति

॥काशी॥
॥६६॥

धायतु॥ गृहीत्वा विप्रवचनाच्चित्तस्थोंनुस्मारतः॥ राज्ञोत देवकृ
च्छ्राणां प्रत्याम्नायं प्रदापयेत्॥ धेनु गोभूहेम धान्य धर्वेनैस्त्रा
दिकं त्वथेत्॥ तदादि शुद्धिमापद्य दहनादिते तस्य रेत्॥ सर्वात्मा
नांशुद्धिमिच्छेत्पित्रादेःपापकर्मणः॥ तं देहे द्विधिना कृत्वा तद्यो
ग्यं सर्वमशेषतः॥ एवमेवात्मनः शुद्धिः कर्त्तो चेत्पापयुग्भवेत्
प्रेतस्य चात्मनः शुद्धिमन्नपानोदकादिकं॥ लोभादिनाकृतं स
र्वमंतरिक्षे विनश्यति॥ ग्रहण्कारिकायां॥ प्रमादादपि निःशंक
स्त्वकस्माद्विधिचोदितः॥ शृंगीदंष्ट्रीनखिव्यालविषवह्निजलाग्नि
भिः॥ चांडालैर्ब्राह्मणैर्म्योरैर्निहतो यत्र कुत्रचित्॥ चांद्रायणं तदर्
द्धकृदयं तस्य विशुद्धये॥ यज्ञाकृच्छ्रान्यंदत्वा दत्वोक्तविधिना दहेत्॥

॥प्रेत॥
॥६७॥

बुद्धिपूर्वं मृतानां तु त्रिंशत्कृच्छ्रं समाचरेदिति ॥ देवज्ञानीये विशेषो
ऽस्ति ॥ ऊर्ध्वोच्छिष्टोऽधरोच्छिष्ट उभयोच्छिष्टके तथा ॥ अस्पृश्यस्प
र्शने चैव खंतरिक्षे मृतो तथा ॥ खट्वायां मरणे चैव तथा निगडबं
धने ॥ सप्तस्वेतेषु कृच्छ्राः स्युस्त्रीन्षट् द्वादशा वा क्रमात् ॥ पंचदश
क्रमेणैव यथासंख्यं प्रकल्पयेत् ॥ पाषाणैर्लकुडैर्दंडैर्हता विस्फो
टकादिभिः ॥ विषैः प्रतपनाद्यैश्च नव कृच्छ्रा विशोधनं ॥ भिक्षा
दानुपघाते च पश्चाद्रुद्धितथैव च ॥ विद्युत्पापमृतानां तु शाकटेन
मृतो तथा ॥ उद्वेणच्चपन्नेणापि मृतानां च विशेषतः ॥ म्लेच्छेन नि
हता ये च प्रत्यन्नाशकच्युतः ॥ चौरादिभिर्हतानां च त्रिंशत्कृ
च्छ्रैर्विशोधनं ॥ विषूचिका तथाध्मान विसंज्ञा कृमितो तथा ॥ शावं

॥काशी॥
॥६७॥

२३

ति

शावं शान्त्युषितं चैव स्त्रीन्कृच्छ्रान्समाचरेदुत्तं ॥ रजस्वला सूतिका यो श्वपा
कस्पर्शने मृतः ॥ अब्दे नेव तु कृच्छ्रेण शुद्धिर्वाक्यायनोब्रवीत् ॥ रज
कश्चर्मकश्चैव नटो बुरुड एव च ॥ कैवर्तमेदभिल्लाश्च सप्तैते संतजाः
स्मृताः ॥ एतत्स्पृष्टोऽपरिति येन यदि दैवात् कथंचन ॥ एकत्रिंशत्कृच्छ्रै
स्तु शुद्धिरन्त्यामनीषिभिः ॥ कुणपे चार्धदग्धे च स्थिता स्पृष्ट्वा सगो
दिभिः ॥ त्रिंशत्कृच्छ्रैर्विशुद्धिस्यात्स्त्रियाः सच्चौ त्रिकृच्छ्रतः ॥ अ
तिक्रांते कादशाहा मृता ये पापरोगिणः ॥ कृच्छ्रत्रयं समाचर्य ते
षां शुद्धौ व्रतं चरेत् ॥ निमित्ततारतम्येन भाय श्चित्तं प्रकल्पयेदि
ति ॥ आलयाऽतस्मृति रलावल्यां व्यासः ॥ आत्मघातस्तु ध्यर्थं
चरेच्चांद्रायणद्वयं ॥ तत्र कृच्छ्र चतुष्का त्रिंशत्कृच्छ्राणि वा पुनः ॥

नो

अ...र्वाकू संवत्सरात्कुर्यादिहेदं नारदीयवचोदितं ॥ कृत्वा नारायणब
लिं निमित्तत्वान्नदायुषमिति ॥ इदं चात्मवधनिमित्तं प्रायश्चित्तं म
तं जातिवधनिमित्तप्रायश्चित्तेन समुच्चितं ॥ पुत्रादिभिः कार्य
मित्युक्तं बौधायनेन ॥ नारायणबलिं व्याख्यास्यामोऽभिशस्त
पतितसुरापात्मत्यागिनां ब्राह्मणादिहतानां च ॥ मदनरत्ने स्मृत्य
र्थसारेऽपि ॥ ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिं
पूर्वकं संस्कारं कुर्यादित्युक्तं ॥ पर्वोक्तपाखंड्यादीनां ब्रह्मस्वलो
सूतिकागर्भिणीनां दुर्मरणमृतानां च नारायणबलिं कुर्यात् ॥ तु
यथा... कृष्णां चिच्छुक्लैकादश्यां नदीमन्यदा तीर्थे वा शुद्धे
देशे गोमयेनोपलिप्य संप्रोक्ष्य दर्भासनमासीनः ... पाद्य ॥ कृताचमनः

५ णा
॥ प्रेत ॥
॥ ६८ ॥

॥ काशी ॥
॥ ६० ॥

२२

प्राणानायम्य देशकालौ संकीर्त्य अमुकसगोत्रस्य अमुकशर्मणः प्रेत
स्य आत्महत्यादिना पाखंड्यादिना वा जनितपापोपशमनद्वारा
और्ध्वदेहिकक्रियायां संप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं
कर्म करिष्ये ॥ इति संकल्प्य ॥ कलशपंचकं व्रीहीणां यवानां वारा
श्युपरि उदकसंस्थं स्थापयित्वोदकेनापूर्यापोहिष्ठेति मंत्रेणाभिमं
त्र्य सर्वौषधीस्ति... लगंधादि प्रतिकलशं प्रक्षिप्य वस्त्रैर्वेष्टयित्वा
पुष्पाणि पंचरत्नं प्रक्षिप्य ॥ तदुपरि ताम्रादिनिर्मितपूर्णपात्रेषु ब्रह्मा
विष्णुशिवयमप्रेतानां पंचमूर्तीरग्न्युत्तारणप्रतिष्ठापूर्वकं स्था
पयेत् ॥ मूर्तिनिर्मितिः सुवर्णरजतं वा कर्षादिपरिमितं यथाशक्ति ततः
आवाहनादिषोडशोपचारान्कुर्यात् ॥ पंचानामपि ॥ तत्र विष्णोः प

रत्नानि च ७

॥प्रेत॥
॥६१॥

रुषसूक्तेन ब्रह्मणः हिरण्यगर्भ इति रुद्रस्य नमस्ते इति यमस्य यमा
य त्वेति प्रेतस्य अमुकप्रेताय नमः इति॥ एवं पंचदेवताः॥ पदार्था
नुसमयेन कांडानुसमयेन वा यथाविधि संपूज्य विष्णवे महा
फलं समर्प्य प्रजासं तर्पण तां वा चयित्वा विष्णुस्तावीतं॥ जीतं
ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्ते स्तु हृषीकेश म
हापुरुष पूर्वज॥ अनादिनिधनो देवः शंखचक्रगदाधरः॥
अव्ययः पुंडरीकाक्ष प्रेतमोक्षप्रदो भव॥ विष्णुधर्मोत्तरे तर्प
णमुक्तं॥ दालभ्यं प्रति विष्णुः॥ सर्वं मातर्पयेद्रूप्यामंत्रैः पौ
राणवैदिकैः॥ तर्पणं पुरुषसूक्तेन मंत्रे विष्णोश्चकारयेत्॥ पु
राणोक्तितं तदित्यादि॥ विष्णुमंत्रो विष्णुसूक्तं॥ ततः स गृह्यो

॥काशी॥
॥६१॥

क्तमार्गेणाग्निं प्रतिष्ठाप्यान्वाधानं कुर्यात्॥ तत्र विशेषः॥ अस्मि
न्नन्वाहिते त्वा विस्यादिचक्षुषी आज्येनेत्यंतमुक्त्वा नारायण
पुरुषसूक्तेन प्रत्यृचं षोडशवारं चरुद्रव्येण यक्ष्ये॥ शेषेणाग्निं स्वि
ष्टकृतमित्यादि प्रोक्तमुक्त्वान्वाधानसमिधोकृत्वा स्वगृह्योक्त
मार्गेण निर्वापविधिना चरुं श्रपयित्वाज्यभागांतं कृत्वा चरुणा
पुरुषसूक्तेन प्रत्यृचं षोडशाहुतीर्जुहुयात्॥ नारायणायेदं न
ममेति त्यागः॥ ततः स्विष्टकृदादिहोमशेषं समाप्यार्चितदेव
समीपे मुख्यगोत्रायामुकशर्मणे प्रेताय विष्णुस्वरूपिणे यं पिं
डइति मधुघृतापुतां तिलमिश्रान्नदशपिंडान्दक्षिणाग्रेषु दर्भे
षु अवनेजनत्वे कं दक्षिणामुखः प्राचीनावीतिपराचीनेन

कृतशेषचरुणा

णाहं

॥प्रेत॥
॥७२॥

णानायम्यदेशकालौ स्मृत्वा प्राचीनावीती दक्षिणाभिमुखो
भूत्वा ॥ अस्मद्वंशे कश्चन मृतोऽनिर्वितो वा वंशे कुले समुत्पन्
तो जातस्तस्य वंशकुलानुद्धारीकरण । पंचवंशकुलोद्धारक
मे करणसिध्यर्थं अस्माकं सर्वेषां सपिंडानां [illegible] परमप्य
र्त्तिनां गोत्रजादीनां च निरयनैमित्तिककाम्यकर्मानुष्ठानसि
ध्यर्थं अमुकसगोत्रोऽहं वस्य अमुकनाम्नाः प्रेतस्य कुलध
धाविधिना स्यागमहं करिष्ये ॥ इति संकल्प्य [illegible] ततो मार्गस्थं
शिलां गंगोदकेन स्नापयित्वा पात्रांतरे निधाय प्रतिमाकां
तस्यां शिलायां पतिता वाहनं कुर्यात् ॥ तत्र मंत्र ॥ इमममस्मा
न्मा तिष्ठ न मे कुथ यगोत्रजा ॥ अश्म वत्से समातिष्ठ नाहं ते व

॥कृ॰शी॥
॥७२॥

न मे धुना ॥ इति मंत्रेण कुशाक्षतैरावाह्य गंधोदकैः संस्नाप्य पु
नरुदकेन स्नानं स्मानं क्षिपेत् ॥ ततो यथाशक्त्या पुष्प धूपदीप भो
दी निपतितस्य दद्यात् ॥ ततो नूतनं सुवर्णमन्वयं कुंभं उदकेन
पूरयित्वा अश्मसमीपे धृत्वा तत्र घटे नीआम्नापतितमावाह
येत् ॥ तत्र मंत्रः ॥ इमं घटं समातिष्ठ मम वंशसमुद्भव ॥ गोत्रज न
ष्टोसि जातस्त्वं नाहं ते वस्रत्र मे धुना ॥ इति कुंभे आवाह्य पंचामृ
तः कुशोदकादि सहिरण्यानिमुक्ताफलादि तस्मिन् घटमध्ये प्र
क्षिपेत् ॥ गंधपुष्पधूपदीपाद्यादन्यन्न फलादि [illegible] चाति
स्थापयेत् ॥ तत्र मंत्रः ॥ इदमन्नमिदं तोयं [illegible] ॥
मम गोत्रे मृते गोत्रजो गोत्रिष्ठ अधुना [illegible] ॥ ततः शारा

प्रति
॥प्रेत॥
॥७२॥

दुपस्थितं पाषाणं तत्कुंभं मुखे परिधत्वा कर्त्ता स्वदक्षिणस्कं
धोपरि कुंभं धारयित्वा ग्रामाद्बहिः सीमायामागते त्रिपथ
मार्गे सर्वैः सपिंडैः ब्राह्मणैश्च स्वज्ञातिसंबंधिबांधवैश्च स
हगच्छेत्॥ पूर्वानीतपुष्पधूपदीपलिङ्गान्नादिताः पदार्थाः
अन्यैः सपिंडैर्गृहीत्वा यमस्तत्पठेत्तो ब्राह्मणश्चागच्छेयुः॥ तत
तः कर्त्ता त्रिमार्गमध्ये स्वग्रामाभिमुखस्तिष्ठन् पृष्ठतो नैवेक्ष्य
माणः सन्मंत्रमुच्चार्य कुंभं परिस्रुत्य स्फोटयेत्॥ तत्र मंत्रः
मम वंशसमुत्पन्नं वंशगोत्रकुलादपि॥ गोत्रभ्रष्टोसि जातं त्वं
पतितः पूर्वकर्मणा॥ दुष्कृतेनेह संसारे स्वकर्माचरवर्जितः॥
पतितः पातकात्पूर्वात्सर्वकर्मबहिष्कृतः॥ तस्मात्त्वं प्रयत्नेन

॥काशी॥
॥७२॥

मम वंशसमुद्भवा॥ त्वत्त्यागं करिष्येऽहं प्रीत्यं गच्छ यथासुखं॥३॥
इदमन्नमिदं तोयं गृहीत्वा तत्र स्थिरो भव॥ मम गोत्रेन ते गोत्रं गोत्र
भ्रष्टोधुना भव॥४॥ अतः परं त्वास्माकं वंशगोत्रकुलादिषु॥
संबंधो नास्ति नास्ति [illegible] वदेव रुध्ये सत्सुनुष्ठान्न॥ इत्यादि मंत्रान्प
ठित्वा घटं शरावद्वयं पाषाणसहितं पृष्ठतः स्कंधोपरि पातयित्वा॥
उच्चैर्वदेत्॥ अस्य पतितस्य अस्माकं सर्वेषां गोत्रजादीनां च
ब्राह्मणानां सर्वसमीपे साक्षित्वे संबंधो नास्तीति त्रिरुच्चैः कु
र्युः गोत्रजातेय च वदेयुः॥ ततस्ते मान्यापतिताय दानीतपुष्प
धूपदीपभक्ष्यतोयादिनादितस्मि [illegible] लेशी [illegible] पेत्॥ ततः
सर्वे ब्राह्मणाः सहकर्त्रा गोत्रजाश्च पृष्ठतोनवेक्षमाणाः स्ना

॥प्रेत॥
॥७७॥

शायं गच्छेयुः॥ ततः सकलमध्येस वैरपि स्नानं कृत्वा कर्ता स्वगोत्र
जसहितः स्नानं दशाहं ... कृत्वा परिधानीय ... स्नानं
कृत्वा अन्यवस्त्रद्वयं धारयित्वा सर्वैः सह ... ततश्च
मदिनमध्ये॥ अथवा द्वितीयदिने स्नानं॥ ततः कर्ता सपिंडैः सह पु
ष्पधूपदीपसिद्धान्नं ... कुंभं च अपक्व हिरण्यादि कृ
त्वाक्षतादीनि गृहीत्वा ग्रामाद्बहिर्जलाशयं गच्छेत्॥ ततः ...
स्नानं कृत्वा वस्त्रद्वयं परिधाय पर्वतसंभारादिकं ...
णं च गृहीत्वा त्रिपथमार्गं प्रति गच्छेत्॥ तस्य पतितस्य नाम
पुष्पधूपदीपादिसिद्धान्नं कुंभं फलादिकं त... दद्यात्॥ त
त्र मंत्रः॥ इदमन्नमिदं तोयं गृहाण ते अस्य ... गोत्र

॥...॥
॥७७॥

त्रते गोत्रं गोत्रभ्रष्टो धुना भव॥ अतः परं तवास्माकं वंश गो
त्रकुलादिषु॥ संबंधो नास्ति नास्तीति गच्छ त्वं यथासुखं॥ इ
ति मंत्राभ्यां निवेद्य पृष्ठतोनवेक्ष्यमाणः सर्वैः सह जलाशयं ग
च्छेत्॥ ततः प्रायश्चित्तं चरेत्॥ तद्यथा॥ कर्ता स्नानं कुर्यात्॥ आ
चम्य प्राणानायम्य देशकालौ संकीर्त्य॥ केचिदत्र मते न हेमाद्रि
प्रयोगमिच्छंति॥ अतः संक्षेपतः प्रयोगः॥ अद्य पूर्वोच्चरित एवं
गुणविशेषणविशिष्टायां पुण्यतिथौ॥ मम वंशसमुद्भवस्यामुक
नाम्ना पतितस्यैकत्वे सर्वलग्नादिसांसर्गिकदोषपरिहारार्थं ... व
स्मावं सर्वेषां गोत्रजादीनां च त्यागधर्मकुलाचार नियमेन मिति
कृत्वा मदादि सकल कर्माधिकारसिद्ध्यर्थं चांद्रायणादि कृच्छ्रत्रयं च

॥गीता॥
॥७५॥

तथ स्वाम्नायप्रोक्तं गोदानादिकं वा हिरण्यद्वारा यथाशक्त्या
नुसारेण आसन्नमृत्यर्थं प्रायश्चित्तं करिष्ये ॥ इति संकल्प्य
तदंगत्वेनादौ वपनं करिष्ये ॥ ततः [illegible] यथाशक्त्या हि
रण्यश्राद्धं कुर्यात् ॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा
अद्यहेत्यादि तीर्थे अमुकपतितस्य संकलनोद्भवदोषपरिह
रार्थं स्वकर्माचरणसिद्ध्यर्थं अस्य पतितस्य तत्पापक्रियाधि
कारार्थं हिरण्यश्राद्धमहं करिष्ये ॥ इति संकल्प्य यथावि
धि हिरण्यश्राद्धं कुर्यात् ॥ ततो गृहं गच्छेत् ॥ इति द्वितीयदिनकृ
त्यं ॥ ७ ॥ अथ तृतीयदिनकृत्यं ॥ ततः पालाशविध्यर्थं पाला
शसमिधादि सर्वोपस्कारसहितं संभारान् गृहीत्वा कर्तास

॥काशी॥
॥७५॥

पिंडेश्रालयेभ्यः सह अन्यत्र रम्यं जलाशयं गच्छेत् ॥ तत्र यथा
विधिना पतितस्य स्वरूपया पूर्वोक्त पालाशविधिं कर्तव्यः ॥ त
तो विधिवत् पतितस्य और्ध्वदेहिकक्रिया कार्या ॥ इति घटस्फो
टादि विधानं समाप्तं ॥ ७ ॥ तत्र सर्पहते नागव्रतं कार्यं यतः संवत्स
रे भाद्रपदे शुक्लपंचमीमारभ्य अन्यां वा शुक्लपंचमीमारभ्य पंच
म्यामुपवासः ॥ यद्वि चतुर्थ्यामेकभक्तं पंचम्यां च नक्तं ॥ दातुमये
ना नागफलं कृत्वा ॥ गंधैः करवीरैः शतपत्रैः जातिपुष्पैः धूपदी
पैरनंतं वासुकिं शंखपद्मकंबलं कर्कोटकमश्वतरं धृतराष्ट्रं शं
खपालं कालियं तक्षकं पिंगलं प्रतिमासनामभिः शुक्लपंचम्यां
संपूज्य ब्राह्मणान् घृतपायसं भोजयेत् ॥ संवत्सरांते चैवं संपूज्य

प्रेत॥
॥७६॥

महाणाश्रोत्रं॥ २॥ नामा सौवर्णनागदानं च कुर्यात्॥ अथ चोभयोः प
क्षयोः पंचमीषु॥ भस्मो नागपिष्टेनावाहिरण्यासितपुष्पैः सितेन
गंधेन तिलतंदुलैरभ्यर्च्य नागाय क्षीरं मोदकं च सुमोनिवेद्य उपस्था
यैवं वदेत्॥ मंच मुञ्चामुकमिति॥ तद्दिने मधुरमश्नीयात्॥ एवमब्द
विधिना नागमभ्यर्च्य पूर्णेऽब्दे यथाशक्ति सौवर्णनागं गां च दद्यात्॥
ततः पूर्वोक्तं नारायणबलिं च कृत्वा॥ श्राद्धादि सर्वं च कुर्यात्॥ तत्रस्म
लवचनानि॥ रत्नावल्यां ज्ञेयानि॥ इति सर्पहतविधिः॥ अथ ब्रह्मचा
रिमरणविधिः॥ ब्रह्मचारिमरणे षडब्दादि यथाशक्ति प्रायश्चित्तं पित्रा
दिकृत्वा विशेषतो व्याक ब्रह्मचारिणः कौपिनादहस्तमात्राः वर्णमात्रौः
कृष्णाजिनानि पादुकाच्छत्राणि गोपिचंदनरुद्राक्षमणिप्रवालमयिज्ञ

...चारी॥
॥७६॥

पमालायज्ञोपवीतानि च तन्मंत्रेण दद्यात्॥ तावत्संख्याकब्रह्म
चार्यसंभवे गृहस्थेभ्यो वा दत्वा नान्समाप्य ब्रह्मचारिणश्चौर्ध्वकु
लशांतिरस्त्विति तान्संप्रार्थ्य तैरस्तु इति भवलिति उक्ते ब्रह्मचारिणश्चौ
र्ध्वदेहिके कर्मणि संप्रदानयोग्यतासिद्धिरस्तु तथास्त्विति च तैः प्र
त्युक्ते ऽग्निमुपसमाधाय देशादि संकीर्त्यामुकसगोत्रस्यामुकशर्मणो
म्रियमाणस्य मृतस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये॥ तदंगं हिर
ण्यश्राद्धं करिष्ये॥ इति संकल्प्य तत्कृत्वा चान्वाधानादि घोरन्यभागांतं
कृत्वाज्येन आज्याहुतीर्जुहुयात्॥ व्याहृतिपश्चात्तस्याः॥ अग्न
ये व्रतपतये॰ अग्नये व्रतानुष्ठानफलसंपादनाय॰ विश्वेभ्यो देवे
भ्यः ततः स्विष्टकृदादि होमकर्म समापयेदिति व्रतविसर्गः॥ ततो

॥प्रेत॥
॥७८॥

प्रवक्ष्यामि यस्तुष्टोस्मि त्वयानघ ॥ प्रेतमोक्षकरं कर्म लोकानां सुखदाय
कं ॥ यस्य स्मरणमात्रेण प्रेतासिद्धिं न जायते ॥ कृषिष्या मेति संकल्प्या
प्रेतो मोक्षमवाप्नुयात् ॥ न कस्यचिदाख्यातं गोपनीयमिदं मम ॥
रहस्यं परमं ह्येतत्सत्यं सत्यं खगेश्वर ॥ पिंडत्रयात्मकं कर्म तव वक्ष्या
मि सांप्रतं ॥ प्रेतानां तृप्तिजननं लोकानां सुखदायकं ॥ तार्क्ष्य उवाच ॥
भगवन्को विधिस्तत्र किं दानं कोत्र दृश्यते ॥ सर्वं विस्तरतो ब्रूहि अ
स्ति चेद्गरुडध्वज ॥ श्रीभग० ॥ तीर्थे गत्वा शुचिः स्नातः स्वस्थमध्यान्हि
कक्रिया ॥ स्थले संकल्पयेद्विद्वान् गोमयेनोपलेपयेत् ॥ तत्र पिंडत्र
यं कुर्यात्पितरं विष्णुमयं स्मरन् ॥ आदौ संपूजयेद्विष्णुमुपचारैः स्व
षोडशैः ॥ औयवमयः पिंडो द्वितीयो व्रीहिसंभवः ॥ तृतीयश्च तिलैः

दै

॥काशी॥
॥७८॥

कार्य एवं पिंडत्रयं खग ॥ यवादि पिष्टप्रभवं कृत्वा विष्णुमयं स्मरे
त् ॥ ततो निमंत्रयेद्विप्रान् सुशीलान् भवर्जितान् ॥ सदाचारान्सु
व्रतान् वेदवेदांगपारगान् ॥ उपवेश्य द्विजांस्तत्र प्राणानायम्य
यंततः ॥ श्राद्धं विधिवद्दत्तं एकोद्दिष्टविधानतः ॥ अज्ञातनाम
गोत्राणां सापिंडिकाप्रिभेदतः ॥ स्पष्ट व्याधार्यति मंत्रेण प्रोक्ष
येदुपहारकं ॥ मधुवाता ऋचं जप्त्वा त्रिर्जपेन्मधुमक्षिति ददा
कालो स्मत्स्वाकरिष्य इति कल्पयेत् ॥ पिंडदानार्थं संकल्पं कुर्याद्दित्यु
र्थः ॥ पितृवंशेति पठ्येत श्लोकं त्रयं विचक्षणः ॥ पितृवंशे मृता ये च
मातृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः ॥
ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगताश्चैव

॥च॥

॥प्रेत॥
॥७१॥

ग्न्यां धाः पांगवस्तुता॥ विरूपा आमगर्भाश्च अज्ञाता ज्ञाता कुले
नाहि॥ धर्मपिंडं प्रदास्यामि ह्यक्षय्यमुपतिष्ठतु॥ अवनेज्य ततः
पश्चात्पिंडद्रव्यं जपेन्मधुमधुमधु इत्यृचः॥ पिंडं गन्धधात्र्यपले
न मधुत्रयसंयुतान्॥ मधुघृतौ। कुशानामल्पीयसे वै ज्ञात्वा तिलान्
प्रक्षिपेद्बुधः॥ इयमं पिंडमादाय पितृवंशेति सर्ववत्॥ पठित्वा से
न्यगोतांस्त्रीन् प्रेतमंत्रान्विचक्षणः॥ पिंडं तिलघृतं कृत्वा दद्या
त्प्रेतसमुद्धये॥ इमं यवमयं पिंडं मधुसर्पिसमन्वितं॥ ददामि त
स्मै प्रेताय यः पिंडं कुरुते मम॥ ३॥ ये केचित्प्रेतरूपेण वर्तन्ते पितरो म
म॥ यव पिंडप्रदानेन तृप्तिं गच्छंतु शाश्वतीं॥ ५॥ ये केचिद्दिवि तिष्ठंति
प्रेताः सात्विकरूपिणः॥ सात्विकात्पिंडदानेन तृप्तिं गच्छंतु तेऽक्षयां॥ ६॥

॥काशि॥
॥७२॥

इति षष्ठी रेकः पिंडो देयः॥ ततः पितृवंशे इति पठित्वावनेज्यं॥
इमं व्रीहिमयं पिंडं मधुत्रयचसंयुतं॥ विशुद्धये प्रदास्यामि पिंडं
ये कुर्वते मम॥ ये केचिद्वायुरूपेण वर्तन्ते पितरो मम॥ तंदुलैः पिंड
दानेन प्रयांतु गतिमुत्तमां॥ ५॥ अन्तरिक्षे च ये केचिज्जातस्ता वायु
रूपिणः॥ सात्विकात्पिंडदानेन तृप्यंतु ते मुदान्विता॥ ६॥ इति ष
ष्ठिद्विताया॥ पुनः पितृवंशे इति गोत्र पठित्वा॥ अवनेज्य॥ इ
मं तिलमयं पिंडं सर्पिषा मधुना युतं॥ तेभ्यो ददामि ये पीडामस्मत्कु
ले कुर्वते सदा॥ ४॥ ये केचित्तामसाः प्रेताः नमोतिष्ठंति सर्वदा॥ ति
पिंडप्रदानेन गतिं गच्छंतु ते परां॥ ५॥ ततोऽसपाश्च ये केचिद्वर्तंते पि
तरो मम॥ पिण्याकात्पिंडदानेन ते तृप्यंतु क्षुधार्दिता॥ इति षष्ठि॥

श्लोकैस्त्वृतीयः॥ श्रीमन्त्रिंशानि वर्द्धत्वा पुनर्दद्यात् नेजनं॥ नमो वद
ति कैलाशो क्रोमंत्रो ऽनयोन रेखांततः॥ स्त्रत्राणि निक्षिपेत् तेषु वर्ति
ष्ठं विचक्षण॥ गंधपुष्पं तथा धूपं दीपं चैव प्रदापयेत्॥ नैवेद्यं च
ततो दद्यात् फलैः कैश्च प्रदापयेत्॥ मातुलिंगै सुकंबारै तनतीभिर्य
था क्रमं॥ सात्विकादि क्रमेण ततः पिंडप्रदानानि [illegible] तर्पणमाच
रेत्॥ तर्पणं तु शंखोदकेन॥ इदो [illegible] दे
शुभे॥ तर्पणं स्याद्वस्त्रानेतु ब्राह्मणान् [illegible]॥ भोज
नं तु ततो दद्यात् पायसं मधुसंयुतं॥ [illegible] कल्प
येत्॥ तान्चैनीरप्रजपेद्विप्रान्दक्षिणा [illegible] येत्॥ सात्विके
भ्यो ददेद्वस्त्रं राजसेभ्यः कमंडलुं॥ उपानचैव तां दद्यात् तामसेभ्यः

र्घं ॥प्रेत॥ ॥८०॥

॥काशी॥ ॥८०॥

खगेश्वर॥ ततस्तान् प्रार्थयेद्विप्रान्संतुष्टान्प्रणिधातिकारकान्॥
प्रार्थितास्ते प्रयच्छंतु शांतिमारोग्यमेव च॥ मंत्रं तु॥ दिव्यांतरिक्ष
भूमिष्ठाः सात्विका राजसास्तथा॥ प्रेता वै तामसा ये न्ये शांतिं प्रय
तु तर्पिताः॥ एवं कृते खगश्रेष्ठ पीडनं च्युतिरस्तु हे॥ आयुष्यं वर्च
नो जित्यं पुत्रपौत्रादिकं ततः॥ स्तुनाधिकं न कर्तव्यं स्मृतं कार्यं न सि
ध्यते॥ विनश्राद्धं न कुर्वीत सत्यमेतन्मयोदितं॥ श्रीभगवा॰ प्रत
ते सर्वमाख्यातं पृष्टोस्मि त्वया खग॥ कल्याणं ते सदा भूयाद्य
थास्थानं प्रगम्यहो॥ १॥ इति पिंडविधानं॥ १॥ श्रीवैद्यनाथेन वि
निर्मिते पलांबोपनाम्ना हि प्रेतकाशी पोषशुक्ल त्रयोदश्यां मदवासा
रे प्रमोदनामसंवत्सरे मोरेश्वरस्तनुनाम्ना वकेन लिखितं समाप्तं॥ १॥

त्रि

,FILE35=0
,FILE36=0
,FILE37=0
,FILE38=0

,FILE39=0
,FILE40=0
,FILE41=0